ॐ ईशानाय नमः (head) । ॐ तत्पुरुषाय नमः (forehead) । ॐ अघोराय नमः (Adam's apple) । ॐ वामदेवाय नमः (right shoulder) । ॐ साध्याय नमः (left shoulder) । ॐ अं हृदयाय नमः (heart) । ॐ रें 10 अर्काय शिरसे नमः (head) । ॐ भुर्भुवः स्वः नमः (...) । ॐ ह्रुं कवचाय नमः (throat) । ॐ हुं फट् अस्त्राय नमः (ear) ।

117. Anganjaliya ri jeng betara sivaditya (to make अञ्जलि at the feet of भट्टारशिवादित्य)

15 ॐ ह्रं ह्रिं सः परमशिवादित्याय नमः ।

118. Mantĕrani sirovista (मन्त्र शिरोविष्ट)

Same as 45.

119. Andelaken (consolidating)

ॐ शिवरूपाय नमः ।

20 120. Tĕritatva (त्रितत्त्व)

Same as 57.

121. Sivikerani desasakti (शिवीकरणी देश(?)शक्ति)

ॐ अं देवशक्त्यै नमः। ॐ उं विष्णुबिम्बशक्त्यै नमः। ॐ मं त्रिशक्त्यै नमः। ॐ अं ब्रह्माय नमः। ॐ 25 उं विष्णवे[2] नमः। ॐ मं ईश्वराय नमः।

---

[1] G. 42, b. [2] MS. विष्णुय.

ॐ भूतनाथपतये नमः। ॐ भूततर्पणाय। ॐ भूतजपनाय नमः।

122. Puja simpen (पूजा)

ॐ वों शिवाय नमः (...)। ॐ हुं सदाशिवाय 5 नमः (the navel)। ॐ हों परमशिवाय नमः (...)। ॐ अः शून्यशिवाय नमः (head)। ॐ फट् बिन्दुदेवाय नमः (heart)।

123. Pasang karasudi rahasya ring caturangula mahasuci ngaren (putting the करशुद्धिरहस्य to the चतुरङ्गुल, 10 that is महाशुचि)

ॐ सं नमः (forefinger)। ॐ अं नमः (the middle finger)। ॐ कं नमः (ring finger)। ॐ उं रः फट् अस्त्राय नमः (little finger)।

124. Lumekas ta empung ku pasirat maring sangar 15 (all being ready, beginning to sprinkle the altar)

श्रेयो भवतु।

125. Pĕranayama (प्राणायाम)

ॐ अं नमः। ॐ अं ब्रह्मणे नमः। ॐ उं नमः। ॐ उं विष्णवे नमः[1]। ॐ मं नमः। ॐ मं ईश्वराय नमः। 20 ॐ मं नमः।

126. Sankepi petangan (next, मुद्रा)

127. Tuntan sang hyang sivaditya maring sangar (bringing शिवादित्य to the altar)

ॐ ॐ परमशिवसूर्याय नमः। ॐ ॐ सदाशिव- 25 सूर्याय नमः। ॐ ॐ सदारुद्रसूर्याय नमः। ॐ ॐ

---

[1] MS. विष्णय.

महादेवहृदयाय नमः । ॐ मं ईश्वरहृदयाय नमः । ॐ उं विष्णुहृदयाय नमः । ॐ ॐ ब्रह्महृदयाय नमः ।

128. Gaveya anantasana padmasana (making अनन्तासन, पद्मासन)

5 129. Utpeti deva ring sangar (उत्पत्तिर्देवस्य) on the altar.

ॐ मं नमः । ॐ उं नमः । ॐ अं नमः ।

130. Astitiyakena (invoking the स्थिति)

ॐ अं उं मं नमः ।

131. Devaperatista (देवप्रतिष्ठा)

10 ॐ ॐ देवप्रतिष्ठायै नमः ।

132. Kutamantera (कूटमन्त्र)

ॐ ह्रं ह्रिं सः परमशिवादित्याय नमः ।

133. Paungeva dening mantĕranta (awakening the God through मन्त्र)

15 ॐकाराद्यन्तरसं रौद्रं गुह्यं शक्तिप्रदीपनम् ।
दीपनं सर्वपूजानां सर्वसिद्धिकरामृतम् ॥

नमः स्वाहा ।

ॐ उं ऊं मं उं अं ग्मुं अं उं अं उं ऊं ॐ नमः स्वाहा ।

नंकाराद्यन्तरसं रुद्रं नंकारेण विदर्भितम् ।
20 कमलीकरणं मन्त्रं सर्वमन्त्रसुसिद्धिदम् ॥

नमः स्वाहा ।

ॐ नं उं नं ग्मुं नं उं नं ॐ नमः स्वाहा ।

ॐ अंकाराद्यन्तरसं रुद्रं अङ्कारेण विदर्भितम् ।
एतस्य मन्त्रस्य बोधनं बोधनं परमं स्मृतम् ॥

25 नमः स्वाहा ।

ॐ उं ऊं ग्मुं हुं ह्रं ॐ नमः स्वाहा । ॐ ग्रिं देवार्चनाय नमः स्वाहा ।

134. Sangkepi (next)

135. Sivikerani (शिवीकरणी)

ॐ इं ईशानाय नमः । ॐ तं तत्पुरुषाय नमः । ॐ अं अघोराय नमः । ॐ वं वामदेवाय नमः । ॐ सं 5 साध्याय नमः । ॐ अं हृदयाय नमः । ॐ रें काय-शिरसे नमः । ॐ भुर्भुवःस्वर्ज्वालिनीशिखाय नमः । ॐ हुं कवचाय नमः । ॐ बं नेत्राय नमः । ॐ उं रः फट् अस्त्राय नमः ।

136. Sankepi kadi nguni (same as above)

10 137. Utpĕti dasaksara tĕriaksara (उत्पत्ति, दशाक्षर, त्र्यक्षर)

इ ब स त अ य न म सि व मं उं अं ।

138. Devapĕrĕtista (देवप्रतिष्ठा)

ॐ ॐ देवप्रतिष्ठाय नमः ।

15 139. Astiti (स्थिति)

स ब त अ य न म सि व य अं उं मं ।

140. Aturana udakanjali (offering उदकाञ्जलि)

ॐ अं कं कसोल्काय ग्रिं क्षमाकरणाय नमः ।

141. Aturana pang padiyargye camaniya (offering 20 पाद्यार्घ्य and आचमनीय)

Same as 76.

142. Nganjaliya (making अञ्जलि)

ॐ आदित्यस्य परं ज्योति रक्ततेजो नमोऽस्तु ते ।
श्वेतपङ्कजमध्यस्थभास्कराय नमोऽस्तु ते[1] ॥

---

[1] G. 48.

143. Toyatarpana (तोयतर्पण)

ॐ ॐ एहि सूर्य सहस्रेषु तेजोरसो जगत्पते ।
अनुकम्पया भक्तिया गृह्यमाणो दिवाकर[1] ॥
नमः नमः ते[2]

5 144. Tarpanatoya (तर्पणतोय)
same as 70 (चतुःसन्ध्या) + 69 (चतुर्ऋषि) + 41 (शिवामृतमन्त्र)

145. Ngastava betara surya (भट्टारसूर्यस्तव)

ॐ स्तम्भ[3] मेरुपरिवर्तसमस्तलोकं
बिम्बाधिदेवय[4] ⏑ वाजिकराय - - ।
10 जम्बोरतीव गगनाय समस्तनेत्रं
अम्बा[5] रबिन्दुशरणाय नमो नमस्ते ॥
दिव्यस्य[6] मूर्त्ति परमेश्वरभास्कराणां
ज्योतिः समुद्रपरिरक्षित नाथ नाय[7] ।
भूःसप्तलोकभुवनत्रयसर्वनेत्रं
15 आदित्य देवशरणाय नमो नमस्ते ॥
कालाय कस्त[8] रवि भास्कर बालदेव
भक्त्या ⏑ मूर्त्तिपरिवर्त[9] सुनिष्कुटाय ।
रत्नाय रत्नमणिभूषित संयुताय[10]
त्रैलोक्यनाथशरणाय नमो नमस्ते ॥

20 [11]146. Sankepi astĕramantĕra petanganan (next, अस्त्रमन्त्र, मुद्रा)

---

[1] G. सृजमानो दिवाकराय. [2] G. 48. [3] G. दृष्टाम्बा.
[4] G. देव निचत. [5] Sic.! [6] G. दिव्यापो.
[7] G. न तनय. [8] G. काष्ठ. [9] G. ०वृत.
[10] सयुताय. [11] G. 49.

Sanskrit Texts from Bali

II.

Stotras.



अग्निस्तुति (वेदपावक)।

श्र

ओकारश्च औकारश्च ऊकारश्च उकारकः ।
अकारश्चैव पञ्च ते वर्णभेदश्च पञ्चमः ॥
भासज्योतिसहस्राणां[1] नाभिमध्ये व्यवस्थितिः ।
तिर्यगूर्ध्वमधस्ताच्च व्यापिता तैस्तु सर्वथा ॥
5 नाभिहृदयवक्षेषु अकाराक्षरमूर्त्तिमान् ।
ऊर्ध्ववक्षेऽर्धचन्द्रश्च बिन्दुश्च शिरसि स्थितः ॥
नादमूलं शिवद्वारं नादमध्यं शिखास्थितम् ।
नादस्तु शिखामध्ये च सर्वे ते ज्योतिलक्षणम् ॥
ब्रह्मविष्ण्वीश्वरा ज्ञेया अकाराक्षरमूर्त्तिजाः ।
10 महादेवोऽर्धचन्द्रश्च बिन्दुश्चैव सदाशिवः ॥
नादमूले स्थितो देवः शून्यश्च परमः शिवः ।
मध्ये शिवपरं शून्यं नादान्ते चापि शून्यकः ॥
ब्रह्मा चाक्षरो विष्णुश्च शब्दश्चैव महेश्वरः ।
संज्ञान्तः परमः शिवः ज्ञानं तु परमं ज्ञानं ॥
15 ॐ अं ब्रह्माय नमः स्वाहा ।
ॐ अं विष्णुय नमः स्वाहा ।
ॐ अं ईश्वराय नमः स्वाहा ।

---

[1] भासन्नति॰.

ॐ अं महादेवाय नमः स्वाहा ।
ॐ अं शिवाय नमः स्वाहा ।
ॐ अं सदाशिवाय नमः स्वाहा ।
ॐ अं परमशिवाय नमः स्वाहा ।

आकाशस्तव (गणपति) ।

5 देवदेवसुतं देवं जगद्विघ्नविनायकम् ।
हस्तिरूपं महाकायं सूर्यकोटिसमप्रभम् ॥
वामनं जटिलं कान्तं ह्रस्व[1]ग्रीवं महोदरम् ।
[2]धूम्रसुतेजवर्णान्धं विकूटं [3]प्रकटोन्नतम् ॥
एकदन्तं प्रलम्बोष्ठं नागयज्ञोपवीतिनम् ।
10 त्र्यक्षं गज मु कृष्ण मुक्ततं रक्तवाससम् ॥
दन्तपिञ्च वरदं ब्राह्मणं ब्रह्मचारिणम् ।
देवं गणपतिं नाथं विहर्षाग्रे तु कनीनम् ॥
देवानां पदिकं श्रेष्ठं नायकं सविनायकम् ।
चक्रतुण्डप्रचण्डाय उग्रकु(तु?)ण्ड नमो नमः ॥
15 चण्डाय गुरुचण्डाय चण्डचण्डाय ते नमः ।
मत्तोन्मत्तप्रमत्ताय नित्यमत्त नमो नमः ॥
उमासुतं नमस्यामि गङ्गापुच नमो नमः ।
ओङ्कारवषट्कारं स्वनराय नमो नमः ॥
यज्ञाय यज्ञहोत्राय यज्ञगोप्ताय ते नमः ।
20 मन्त्रमूर्ति महायोगी जातवेद नमो नमः ॥

---

[1] MS. स्वर. [2] Vin. धूम्रसिन्दूरयुग्गण्डं. [3] Vin. प्रकटं विकटो०.

सहस्राय सहस्राय जगद्वक्राय ते नमः ।
अग्निहोत्राय शान्ताय अपरजि नमो नमः ॥
घनाय मेघवर्णाय मेघस्वर नमो नमः ।
प्रभु विभु परं ब्रह्म परमेष्ठि नमो नमः ॥
5 मस्ते मुक्त सभस्मास्रं मुक्तमायाधराय च ।
भक्तिप्रायाय शान्ताय महातेजाय ते नमः ॥
नमोऽन्नत नमस्तेऽस्तु नमस्ते भक्तवत्सल ।
नमस्ते गजवक्राय नमस्ते चण्डविक्रम ॥
नमस्ते रुद्रशान्ताय प्रलम्बजठराय च ।
10 अ उ मताय देवाय एकदन्ताय ते नमः ॥
सूर्यकर्णाय शूराय दीर्घदन्ताय ते नमः ।
सर्वदेव नमस्तेऽस्तु विघ्नं हरतु सर्वदा ॥
शिवाय शिवपुत्राय देवाय परमात्मने ।
पार्वतीसूनवे तुभ्यं शिवमूलाय ते नमः ॥
15 कालकन्दयवे तुभ्यं परमानन्दस्वरूप ।
अनुरूपगणेशाय रूपिणि लोकशरणे ॥
प(म?)दक्लिन्न[क]पोलाय गणाधिपतये नमः ।
पूर्वाह्ले पूर्वपूजाय पुरुषाय नमो नमः ॥
विघ्नं हरतु देवेभ्यो शिवपुत्रो विनायकः ।
20 तस्य वक्षं नमस्यामि जगज्जीवं विनायकम् ॥
अनादिनिधनेशाय नमस्ते विश्वतोमुख ।
एकदन्तं महाकायं तप्तकाञ्चनसन्निभम् ॥
लम्बोदरं विशालाक्षं वन्देऽहं गणनायकम् ।
चित्ररत्नविचित्राङ्गं चित्रमालाविभूषितम् ॥

कामरूपधरं देवं वन्देऽहं गणनायकम् ।
मोञ्च कृष्णाजिनधरं नागयज्ञोपवीतिनम् ॥
बालेन्दुसगरमौलिं वन्देऽहं गणनायकम् ।
मूषिकोतरवरुण्यं वयिम सुमहायेत् ॥
5 ऊर्ध्वकायं महावीर्यं वन्देऽहं गणनायकम् ।
यक्षकिन्नरगन्धर्वसिद्धविद्याधराधिपम् ॥
सुरमणं महाशालं वन्देऽहं गणनायकम् ।
गजवक्त्रं सरस्त्रेऽस्ति कर्णचामरभूषितम् ॥
पाशाङ्कुशधरं देवं वन्देऽहं गणनायकम् ।
10 अविकारं वेदानन्दं मन्त्रभिः परमेष्ठिकम् ॥
भक्तप्रियं मदमत्तं वन्देऽहं गणनायकम् ।
सर्वविघ्नकरं देवं सर्वविघ्नविवर्जकम् ॥
सर्वसिद्धिप्रदातारं वन्देऽहं गणनायकम् ।
शिवलोकमवाप्नोति शिवेन सह मोदयेत् ॥
15 इदं स्तोत्रं शुचिर्भूत्वा यः पठेत्सततं नरः ।
विप्रो भवति विद्यावान् क्षत्रियो विजयी भवेत् ॥
वैश्यस्तु धनमाप्नोति शूद्रः पापात् प्रमुच्यते ।
गर्भिणी लभते पुत्रं कन्या भर्त्तारमाप्नुयात् ॥
अस्नातो लभते स्नानं बद्धो मुच्यते बन्धनात् ।
20 इदञ्चाप्यञ्चहोत्तमं सद्योपय नमो वच ॥
सर्वमङ्गलमङ्गले शिवे सर्वप्रसादके ।
इत्येवमादि चरितं सर्वव्याधिहरं शुभम् ॥

इन्द्राणीस्तवः ।

ॐ इन्द्राणी देवता लक्ष्मीर्विजया भुवनेश्वरी ।
शक्तिः सकलकामदा जपातिनेन्द्रेन्दोवच ॥
इन्द्राक्षिणी महादेवी देवतासमुदाहिता ।
गौरी सह हरिदेवी दुर्गानामेति विश्रुता ॥
5 सहस्राक्षश्रगहिस्त्री ब्राह्माणी ब्रह्ममण्डिनी ।
नारायणी भद्रकाली रुद्राणी कृष्णपिङ्गला ॥
अग्निज्वाला रुद्रमुखी कालरात्री तपस्विनी ।
मेघश्यामा सहस्राक्षी विष्णुमाया महोदरी ॥
जटाधरी मुक्तकेशी घोररूपा महाबला ।
10 शुचिमिविदिचि विद्या महालक्ष्मी सरस्वती ॥
अनन्तविजया प्राणा मनस्तुकापराजिता ।
तपादिमर्वति सिता चन्द्रकान्ता महोत्तमा ॥
अर्धनामशतेन हि मुच्यते व्याधिबन्धनात् ।
अथार्धेन सहस्रेण लभते वाञ्छितं फलम् ॥

ईश्वरस्तवः ।

15 ॐ नमोऽस्तु परमेश्वराय सकलभूषणकारणाय महादेवताय महादेवप्रत्यङ्गगुणगणविशिष्टधारिणे चतुःशक्तिचतुर्भुजत्रिनयनगजेन्द्रकपालालङ्कृतशिरस्काय वासुकियज्ञोपवीतिने हिमवत्सुचीकृतार्धनरेश्वराय मदनतनुदहनदह्यमानकालनश्यन मुनिवर निलमभक्तिप्रणतजाप-

नित्यपुष्पार्चनन्टत्तगीतस्तुतिगन्धपवन जवनजनजनितधूप-
दीपाक्षतमननमस्कार तम्बोलविविधविधिनर्चनाय प्रवाल-
धवल मकरशयन प्रभुगणगगनसङ्गमनाय च चतुर्दश-
पशुमुङ्गलात्म आत्मीयशरीराय स च भगवान् महेश्वरः
5 सर्वभूतानुकम्पी चराचरवत्सलः प्रणतकन्तुकप्रभावभुवन-
भविभवनेन्द्रः कलुषक्षपणेन विमोचनाय सर्वगतचित्त-
चैत्तककारणाय प्रयोजनाभेदाय समाधिसद्यःसाधन-
समर्थोऽपि शाश्वतसदापरिमितगुणगणनिधानः तत्तचामी-
प्रभावादर्थात् अस्मत्सुखकारणोऽस्मान् पालयतु स्वाहा।

उमास्तवः।

10　ॐ पार्वतीं तां नमस्यामि रुद्रपत्नीं प्रकाशिनीम्।
देववतीं शुभवतीं सदाऽनुग्रहकारिणीम्॥
गौरीमुमां नमस्यामि रुद्रदेहदिपसिदाम्।
यशस्विनीं गुणवतीं भक्तानुग्रहकारिणीम्॥
शान्तिशान्तां नमस्यामि भवानीं भक्तवत्सलाम्।
15　गुवाश्यम हरि देवि तुभ्यं नित्यं नमो नमः॥

गंगास्तवः[1]।

ॐ गङ्गाद्वारे प्रयागे च गङ्गासागरसङ्गमे।
सर्वज्ञता भूर्लभते त्रिभिः स्थानैर्विशेषताम्॥
पापोऽहं पापकर्माऽहं पापात्मा पापसम्भवः।
त्राहि मां पुण्डरीकाक्ष सबाह्याभ्यन्तराशुचिम्॥

---

[1] Cf. Sup. p. 23-25, n° 99 and n° 105.

अशुचिर्वा शुचिर्वाऽपि सर्वकामगतोऽपि वा ।
चिन्तयेद्देवमीशानं सबाह्याभ्यन्तरं शुचिः ॥
ॐ गङ्गादेवी महापुण्यं सोमो वाऽमृतमङ्गलम् ।
मङ्गलं शिवकार्याणां शिवकुम्भमहोत्तमम् ॥
5 ॐ गङ्गा हरजटाधर्मा पवित्रं पापनाशनम् ।
सर्वविघ्नविनाशश्च त्र्यम्बकस्य प्रभावतः ॥
ब्रह्मा विष्णुर्महादेवस्तोयस्ते तोयदेवकः ।
अमृतं सकलं देहि गङ्गादेवि नमो नमः ॥
ॐ तीर्थस्नानं महागङ्गा सागरं अरलायते ।
10 नारायणाद्यग्पद्दोऽपि कुम्भतीर्था महानदी ॥
ब्रह्मा विष्णुश्च रुद्रश्च त्रयस्ते तोयदेहकाः ।
अमृतं सकलं देहि गङ्गादेवि नमो नमः ॥

गणपतिस्तवः ।

ॐ नमोऽस्तु ते गणपते सर्वविघ्नविनाशन ।
सर्वकार्यं प्रसिध्यतु मम कार्यं प्रसिध्यताम् ॥
15 विनायकं गणपतिं सर्वविघ्नविनाशनम् ।
महाशक्तिकरं नित्यं त्वां नमामि वरप्रदम् ॥
आमोदश्च प्रमोदश्च सुमुखो दुर्मुखस्तथा ।
अविघ्नो विघ्नरूपश्च इत्येते षड्विनायकाः ॥
नदस्वर्गाधिपं देवं देवदेवविनायकम् ।
20 नराणां भक्तिकारणं सर्वकार्यफलद त्वम् ॥
समुद्रे तथाऽतिघोरे सङ्ग्रामे शत्रुबन्धने ।
त्वयि सिद्धं ग्रामे चापि सर्वं विघ्नं विनाशय ॥

द्वादशस्मर (स्मरस्तुतिः) ।

ॐ अनङ्गो भगवान् रुद्र ईश्वरः कुसुमायुधः ।
कामश्च शङ्करश्चैव हरिश्च धर्म एव च ॥
मनोभवः शिवश्चैव ईशानो मदनस्तथा ।
मत्स्यकेतुर्महादेवो मन्मथश्च सुरेश्वरः ॥
5 अनङ्गो पृथिवीं विद्यात् सलिलं कुसुमायुधः ।
कामः प्रतिष्ठति तेजः कन्दर्पो वायुरेव च ॥
मनोभवस्तथाऽऽकाशं मदनः सोम एव च ।
मकरध्वज आदित्यो मन्मथश्च परीक्षितः ॥
अनङ्गः श्वेतवर्णश्च मदनो नीललोहितः ।
10 मकरध्वजः सोमश्च कुसुमायुध उज्ज्वलः ॥
कन्दर्पो पष्टिकश्चैव स्मरो धूम्रस्तथैव च ।
मन्मथः पीतवर्णश्च मनोभवो हृद्यश्यमः ॥
ॐ ॐ (सङ् ह्यङ्)स्मरदेवपूजाय नमः स्वाहा ।

द्वादशस्मरस्तव ।

ॐ अनङ्गः श्रावणे यश्च भाद्रपदे च कौसुमः ।
15 कामश्चैवाश्विने मासे कार्त्तिके मदनस्तथा ॥
मार्गशिरे मनोभवः पौष्ये च मकरध्वजः ।
कन्दर्पो माघमासे च मन्मथश्चैव फाल्गुने ॥
चैत्रे च कामदेवश्च स्मरश्चैवापि वैशखे ।
सनत्कुमारो ज्यैष्ठे तु मनसिजः सदा तथा ॥

पंगस्तवन (विश्वेदेवाः)।

ॐ गिरिपते देवदेव लोकनाथ जगत्पते।
शक्तिमतां महावीर्य ज्ञानवतां शिवात्मक॥
महेश्वर दिव्यचक्षुर्महापद्म नमो नमः।
घोरघोर महारक्षक्ष आदिदेव नमो नमः॥
5 परमेष्ठ परमेष्ठि परमार्थ नमो नमः।
आदिकारण भिषञ्च नकराय नमो नमः॥
महारौद्र महाशुद्ध सर्वपापविनाशन।
महामूर्त्ते महातत्त्व पशुपते नमो नमः॥
महादेवः शङ्करश्च शम्भुः शर्वो भवस्तथा।
10 ईश्वरो ब्रह्मा रुद्रश्च ईशानशिवाय नमः॥
[1]ॐ नमस्ते भगवन्नग्ने नमस्ते भगवन् हरे।
नमस्ते भगवन्नीश सर्वभक्ष हुताशन॥
त्रिवर्णो भगवानग्निर्ब्रह्मा विष्णुर्महेश्वरः।
शान्तिकं पौष्टिकं चैव रक्षणं चाभिचारुकम्॥
15 अनुज्ञानं कृतं लोके सौभाग्यं प्रियदर्शनम्।
यत्किञ्चित्सर्वकार्याणां सिद्धिरेव न संशयः॥
ॐ ब्रह्मा प्रजापतिः श्रेष्ठः स्वयम्भूर्वरदो गुरुः।
पद्मयोनिश्चतुर्वक्त्रो ब्रह्मसखायमुच्यते॥

---

[1] B inserts before this line:
ओं चं ब्रह्मा चतुर्मुखो ब्रह्मा विद्यात्मको मुनिः ब्रह्माग्निरक्तवर्णश्च ब्राह्मणाय नमो नमः।

पञ्चदशारसस्तुतिः (पञ्चदशवज्र-देवतास्तुतिः)।

श्रीः(स्त्रु ?)

वज्रज्वालानलकाव्यं निलिगर्भं प्रसाद्य तम्।
दीप्तवज्रं समुल्लोल्य सत्त्वपर्यङ्किनं नमे॥
ज्वालावज्रारिक्षत् सव्यो वामे सव्ये नतं च यः।
नीलवज्रो नीलो रुष्टः प्रत्यालीढस्थितं नमे॥
5 ऋजुकुण्डलकोदीप्तं क्षिपे दक्षिणप्राणिनः।
साममे क्रोधमुष्टिकं वज्रनेति सुनीलकम्॥
वज्रधर्माधारस्थितं दक्षिणकेन तर्जयन्।
अधोबन्धमहारक्षो प्रत्यालीढस्थितं नमे॥
ज्वालावज्रि करे सत्त्वे तत्त्वं शिवमरुस्थितम्।
10 सितं नीलं महाक्रोधं भैरवाक्षिखगं नमे॥
क्षयाक्षयग्रगीतार्थं वज्रदंष्ट्रं हृदि स्थितम्।
क्रोधमुष्टिकरं नमे वज्रयक्षं सिद्धिप्रदम्॥
लस्यहदुष्णिभृत्सव्ये सर्वहृत्तर्जनीक्रियम्।
प्रत्यालीढेन दिग्वन्दे वज्रानिशं शिवं नमे॥
15 सव्येनोदर्मयं पाशं चिदिवमेनकाजयम्।
भान्द्रदेशकटस्थानं वज्रपाशं नमाम्यहम्॥
ददते तर्जयन् वामे पटखण्डक्षिणाश्रयः।
नमो वज्रपताकाय पिङ्गल शैवभारुणम्॥

त्रिशूलं परिसंग्रहं दक्षिणापिङ्गलं चैव ।
वन्दे खड्वाङ्गहृत् वामे वज्रकालीं द्रणीदिशम् ॥
भूम्टदुत्कर्षिसर्वाग्र नीलाकुञ्चितमूर्धनम् ।
वन्दे त्वां वज्रशिखरं रम्यरातटापुष्पदि ॥
5 पङ्कते तर्जयन् वामे बिभ्रते चापि पञ्चकम् ।
विश्ववज्र ग्रसवव्य नमस्ते वज्रकर्मणे ॥
नीलाञ्जनं ततस्तमं शृङ्गारवल्कनिष्ठिकम् ।
तर्जकं तर्जाविभ्याश्रं वज्रहुंकारमाश्रये ॥

पितृस्तवः ।

ॐ स्वाहा स्वधा च पूजा च त्रिविधाः पितरस्तथा ।
10 पिता पितामहश्चैव ततश्च प्रपितामहः ॥
माता मातामहाश्चान्या प्रपितामहसंज्ञिका ।
पितरस्तर्पणं यान्तु येऽपसव्योदहादपि ॥

ॐ शिवमपि पितृरूपं पितृकाणां हितार्थं त्रिनयन-वृक्षहल्कोकसङ्गारकलम् तामजा मातुलं एकं विश्वस्य
15 रक्षणार्थं भुवनाश्रयमनन्तम् ब्रह्मरूपं नमामि । नमो पितृवत्सलाय सर्ववीरकरशतवेलाय सर्ववीरपालकाय सिद्धिप्रदान नमो नमः स्वधा ।

सोमपानं च विप्राणां क्षत्रियाणां च विर्भुजः ।
वैश्यानां मद्यपानं च शूद्राणां तु सुखार्थिनाम् ॥
20 नमः स्वधा ।

पृथिवीस्तवः ।

ॐ पृथिवीशरीरं देवी चतुर्देवमहादेवी[1] ।
चतुराश्रमभट्टारी शिवभूमिगता[2] सिद्धिः ॥
इपूर्वा निङ् वसुन्धरी शिवराचि म्पु प्रहोनि[3] ।
उमा दुर्गा गङ्गा देवी [4]ब्रह्मी भटारी वैष्णवी ॥
5 महेश्वरी[5] सङ् कुमारी गायत्री देववि गौरी[6] ।
हर्षसिद्धि महावैरी इन्द्राणी चामुण्डी देवी[7] ॥
श्रीदेवी महावक्राणां चतुर्ज्ञानमहावीर्या ।
चिन्तामणिकुरु स्मृता श्री चाण्डाली महादेवी ॥
श्रीमातामहा सोहिता चचसिंभेषुकनित्यम् ।
10 जीवितं चित्तकाञ्चनं श्रीदेवी चानकसंवन् ॥
सर्वरूपवती तस्य सर्वं इक मणिदत्वन् ।
ॐ श्रीश्री देवी नमो नमः स्वाहा
श्रीदेवी त नमः स्वाहा ॥
पृथिवीशरीरं तोयं त्वमग्निर्वायुरेव च ।
आकाशं च परम्पुकं शशाङ्कालादिकालान्ता ॥
15 ॐ इ आकाशमरलवाय हुं ।

प्रणवभेदस्तुतिः ।

स्वरापो भूरिति ज्ञेयस्तेजो वायुर्भुवः स्मृतः ।
आकाशो मनश्च द्वयं सर्व[8]लोकविसंज्ञकम् ॥

---

[1] A चतुर्—missing.— [2] महासिद्धि—
[3] रिपूर्वा निङ् आसुन्दरी शिवंपति म्पु प्रवोनि.— [4] गौरी ।
[5] ईश्वरी । [6] गायत्री, etc., missing—
[7] B stops here, adding :—ओं श्रीदेवि भवाय नमः स्वाहा । [8] तपर्° ।

तन्मात्राहङ्कारो बुद्धिर्महर्लोकः प्रकीर्त्तितः ।
अव्यक्तपुरुषकस्तु जनः पश्चात्तु सत्यकम् ॥
अग्निश्चैव त्रिभवनं रविश्चापि महस्तथा ।
जनस्तपश्च सत्यं तु चन्द्रशुक्लः शिवः स्मृतः ॥
5 चन्द्रश्च त्वद्दयो योगी रव्यग्न्योरपि संयोगः ।
उकारः परितोषदः अकार ऊर्ध्वनक्षत्रे ॥
ईशानस्तु हकारो भूत् ओर् मध्यमे द्दमेव च ।
ऊकारो दम्भवद्योगमोङ्कारमिति तद्विदुः ॥
ब्रह्मा च महादेवश्च विष्णुश्च सदा ज्ञनाः ।
10 पञ्चैते देवा विज्ञेयाः प्रणवाः पञ्च बिन्दवः ॥
मध्ये अकरणं ब्रह्मा अधो तु विष्णुसंज्ञकः ।
ऊर्ध्वबिन्दुर्मकारोऽभूदीश्वरश्चैतिसंज्ञकः ॥

प्रायश्चित्तस्तवः ।

ॐ प्रायश्चित्तकरो योगी चतुर्वर्णं विचिन्तयेत् ।
चतुर्वस्त्रान्तपुष्पाद्यमघोरेभ्यस्तथोत्तमान् ॥
15 ॐ अघोरेभ्यो नमः स्वाहा ।
उल्कापातसहस्राणि नक्षत्रं दोषसंयुतम् ।
ग्रहयुद्धं चिरवर्षं शमयेत् साधकः शमम् ॥
शतसंवत्सर्वव्याधिः शङ्कागतोऽथ जनः ।
उक्षीणश्चेत् परिखिन्नः प्रायश्चित्तात् सुखी भवेत् ॥

श्रीयजुर्वेदबुद्धस्तुतिः ।

श्री

अष्टदुर्गागतोज्झितं अक्षरमन्त्रसंयुतम् ।
जिह्वाग्रतालुसंश्लिष्टं तूर्यसंश्लिष्टलोचनम् ॥
पुरस्तादीश्वरः स्थाप्यो ब्रह्मा देवश्च दक्षिणे ।
पश्चिमे तु महादेवो विष्णुरुत्तरखण्डके ॥
5 मध्ये ज्ञानं च परमं ज्ञाता देवी संयोगवित् ।
प्राणमुद्धृतयोगेन ऊर्ध्वङ्गस्त्वं तु पावक ॥
प्रणवज्ञानमन्त्रेण चिनम्रण संयोगवित् ।
जिह्वाग्रतालुसंश्लिष्टं तूर्यसंश्लिष्टलोचनम् ॥
कपालं वायुद्दिभ्यः शिवद्वाराद्विनिर्गतः ।
10 प्राणास्त्यजन्ति तद्वारं प्रणवश्च विनिर्गतः ॥
चिन्न घ्रणन्तु यो योगी विषतें परमं ज्ञानम् ।
व्यापि सर्वगतं चैव सूक्ष्मं तत्परमं ज्ञानम् ॥
सदा बुद्धमिदं ज्ञानं सदा धर्ममिदं ज्ञानम् ।
सदा सङ्घमिदं ज्ञानं परमश्च तथागतः ॥

15 ॐ बुद्धाधाराय नमः स्वाहा । ॐ बुद्धमातृभ्यः स्वाहा । ॐ बुद्धज्ञानाय नमः स्वाहा । ॐ बुद्धगोचराय नमः स्वाहा । ॐ बुद्धाम्बराय नमः स्वाहा । ॐ बुद्ध-ज्ञानाय नमः स्वाहा ।

बुद्धमूलस्तुतिः (बोधिमूलस्तुतिः) ।

स्रू

यः पूर्वं बुद्धमूले कविकरणवते[1] मारगाग्रं
गङ्गादाघागकाक्षत्यगणकगणकाक्षत्थबन्धक्षणार्ध[कक्षे][2] ।
आस्त्रीभीदिव्यरूपादुडुपतिदुदुबीडूडुभीरा[3]
क्षेबादेवानुयातः[4] सुरनरनमितः पातु वः शाक्यसिंहः ॥
5 भो दण्ड रामकादिप्रतिभयकुहरे दर्पखण्डी[5]
रामन्दाडिम्बडादिम्बदुहकुदुह—स्त्रू कलास्त्रकलास्त्र[6] ।
जिम्बाञ्जभञ्जजिम्बां कमुखमुखकुमङ्कुः कुमङ्कुः
वाद्यारेणानरीतः[7] सुरनरनमितः पातु वः शाक्यसिंहः ॥

भैरवस्तवः ।

शा

महाभैरवरूपश्च स्त्रा शुद्धरागलोचनः ।
10 महायशा महाग्रीवो वायुवेगसमाश्रितः ॥
ज्ञानकाञ्चनवर्णश्च नारी चैव खगाकृतिः ।
कान्तश्चैव नासज्ज्ञानो दोरञ्चिननमक्षत्यम् ।
महापीतं भवेद्वर्णं जान्वन्तं पादमूलकम् ।
महाश्वेतं भवेद्वर्णं नाभ्यन्तमूरुमूलकम् ॥
15 महारक्तं भवेद्वर्णं हृद्यमुतालुकण्ठकम् ।
महाकृष्णां भवेद्वर्णं वहादि शिरसान्तकम् ॥

B. 1 ग्रविगरणान् तपते. 2 गङ्गाग्रेद्यगघक्षत्यगणकघणकक्षत्यबण्डासनाण्डकचे.
3 स्त्रोबिव्यरूपे दूदूपतिदूर्दूर्भिदूदूभिर्. 4 सोभ्बनेयनूयतः. 5 नर्षकदि.
6 ०दिम्बद्वण्डुहन्दुहकुदूहं स्नुकलं मान्नकुलमृच.— 7 वन्येरेननरतिः.

ॐ ह्क्षम्ल्व्यं महाश्वेतवर्णाय नमः स्वाहा । ॐ ह्क्षम्ल्व्य उं रक्तवर्णाय नमः स्वाहा । ॐ यं लं मं नं वषट् अ अं कृष्णवर्णाय नमः स्वाहा । ॐ अक्षम्ल्व्युं नाम पीतवर्णाय नमः स्वाहा ।

महादेवस्तवः ।

5 ॐ नमोऽस्तु ते महादेव पीतवर्ण पीताम्बर ।
पद्मासन महादेव शची देवी नमोऽस्तु ते ॥
महासूक्ष्मं महाकलं महासूक्ष्मं महाव्रतम् ।
महास्कन्धं महाकायं नमोऽस्तु ते महादेव ॥
ब्रह्मा विष्णुरीश्वरश्च महादेव नमोऽस्तु ते ।
10 सर्वकार्यं प्रसिध्यतां क्षमानुग्रहकारणम् ॥

यमराजस्तवः ।

शा

ॐ सद्योजाता पूर्वा दिशा स निर्वाकुर् शिखरिका
सारिका श्वेतबजसा सगन् बज्रन् दजन्योस
ॐ वामदेव दक्षिणाभ भक्तगर्ग अमिताभ
बतरक्तहरूतब बतमिदन्ददेमभ
15 ॐ तत्पुरुष पश्चिमतस्तमश्च मेचिचस्पित
तपिता शिखिमङ्गीत तगार्घि पषारुत्पुत

etc. Totally unintelligible.

यमस्तवः (भूतस्तवः)।

ॐ यमराज सदोमेय यमे दुरुदयोदय।
यदयोनीर यक्षीय यक्षि सञ्च नरमय॥
ॐ भूतराज महाक्रूर सहस्रकिरणप्रभ।
तद्वक्त्रसंयुतश्चैव सकलस्वहिताकरः॥
5 मकाराक्षरसंभुजो हिरण्यगर्भसम्भवः।
महाप्रेतसमारूढो नागयज्ञोपशोभितः॥
ईशः पुरुषो विज्ञानं कालो भागो रजः भूतः।
सत्त्वं बुद्धिरहङ्कारो मनश्चैकादशाननः॥
ॐकारः शिवप्रतिष्ठा शिवार्चनं महामृतम्।
10 अमृतं च शिवार्चनं सदाशिवो महामृतम्॥
सर्वमङ्गलमाङ्गल्य शिव सर्वप्रसादक।
शरण्य त्र्यम्बकदेव नारायण नमोऽस्तु ते॥
शरणागतानां नाथ परित्राणपरायण।
सर्वस्यन्तिहरे देवि नारायणि नमोऽस्तु ते॥
15 सर्वस्वरूपे सर्वांशे सर्वशक्तिसमन्विते।
भयेभ्यस्त्राहि नो देवि दुर्गादेवि नमोऽस्तु ते॥

रतिस्तवः।

ॐ शिरःस्थमदनात्मिके शिखालोमवती देवी।
शून्यस्थानोस्कारवती वक्त्रे च चन्द्रकारणम्॥
अक्ष्योर्द्वकुमारी देवी भ्रुवोर्विचित्रवती च।
20 शिखाग्रे बिम्बधारिणी श्रुतिकान्तिनर्मिकयोः॥

चेदे करे करवी च वस्ते ऊर्ध्वौ द्वसुसौम्ये।
जिह्वा सरस्वती देवी ग्रीवा मनोमया देवी॥
बाहुश्च हुलवाहिनी सले सले श्रं कुसुमे।
अष्ट द्व धर्मकादेवी मङ्गलकारकस्तने॥
5 करस्था कुसुमदेवी सखिल सद्यवाहिनी।
स्तनो अमृतमङ्गल्यं हृदिस्था उवती देवी॥
अम्बुस्थानिके कृष्णा देवी नाभिः पुण्डरीकस्थाने।
गर्भस्था जयवाहिनी पुण्डे गोमयिका देवी॥
वर्णमयी देवी पृष्ठे मध्ये कलोकवती च।
10 जघने श्रोणिका देवी ककम्पु हर्षिका देवी॥
वामास्य अम्बिकादेवी अम्बिलिका दक्षिणस्य।
विवरे पद्मवाहिनी रसद्वक्ष्मा गर्भस्थाने॥
कुसुमायुधसंयोगो रतिश्च भवती तथा।
मध्ययोनि कपुजोग्च रसनिरसमूर्त्तिनः॥
15 उदयरूपेणाश्लिष्टा स्मरतन्त्रे च वाक्येन।
ओर्वर् द्वस्यसङ्किनी सुखलवक्ष्ममहिजा॥
पदेकरेण सुन्दरी दलकेशिनी सुन्दरी।
कौतेन संस्थित्या वपुर्मदनकार्यको नरः॥

ॐ स ब त अ इ नमः शिवाय अं उं मं नमो
20 नमः स्वाहा।

वज्रानलस्तुतिः ।

श्री

यक्षरूपमिमं देवं विश्ववर्णं महोदरम् ।
भुजान्त्राद्यङ्गसर्वाङ्गं उर्ध्वकेशं भयङ्करम् ॥
आताम्रनयनं चैव गदाहालकहस्तकम् ।
वामेष्टमे लालजिह्वं आलीढप्रेतवाहनम् ॥
5 देवीसहितवामाङ्गं वामनं च महाबलम् ।
सत्कहेतुभूतं च सर्वमारप्रमर्दकम् ।
चक्रमध्ये स्थितं व्यक्तं प्रवरमुखमुत्तमम् ॥
ओंकाराक्षरनिजक्तं यमराजं नमाम्यहम् ।

- - - - - - - - - - - - - - -

10 यक्षरूपमिमं देवं श्वेतवर्णं महोदरम्
पूर्वदिशास्थितं व्यक्तं मध्याभिमुखमुत्तमम् ।
ओंकाराक्षरनिजक्तं भावाभावं नमाम्यहम् ॥
यक्षरूपमिमं देवं रक्तवर्णं महोदरम् ।...
दक्षिणासंस्थितं व्यक्तं मध्याभिमुखमुत्तमम् ॥
15 ओंकाराक्षरनिजक्तं सिंहवाहं नमाम्यहम् ।
यक्षरूपमिमं देवं पीतवर्णं महोदरम् ॥

- - - - - - - - - - - - - - -

पश्चिमसंस्थितं व्यक्तं मध्याभिमुखमुत्तमम् ।
ओंकाराक्षरनिजक्तं मत्थनं च नमाम्यहम् ॥
20 यक्षरूपमिमं देवं कृष्णवर्णं महोदरम्

- - - - - - - - - - - - - - -

उत्तरसंस्थितं व्यक्तं मध्याभिमुखमुत्तमम् ।
ओंकाराक्षरबीजक्षं वत्सलं च नमाम्यहम् ॥

वरुणस्तवः ।

ॐ रत्नाकर सद्रन्तं गोरागोरसर नित्यम्
कावेरीगिरिमूर्त्तीनां नन्दगोरसमुद्रान्तम्
5 ब्रह्मविष्णुमहेश्वरं नवतीर्थप्रवक्यमम्
शक्तिवीर्यवज्रमूर्त्ति गूणिगोरमण्डलम्
नवतीर्थामृतदेव सर्वदेवशरीरं त्वाम्
अहजलमूर्त्तिगिरि आकाशं निर्मलं तोलम् ।
गङ्गामूर्त्ति रत्नाकर सर्वदेवातिदेवता ।
10 सरःसिन्धुसमुद्रं त्वं त्वमग्निः अर्णवोज्वलः ॥
मत्स्यभूमिमहलङ्गं देवदेव वरुणश्च
क्रूरवक्र नागरूप गङ्गासागरसम्पूर्ण
त्वं मत्स्यरौद्रणं रूपं वरुणश्च नागरूपम्
मत्स्यलम्बरशरीरं नागेन्द्रमीनरूपं च ॥
15 हस्तिरूपं देमत्स्यं रौद्रणं मत्स्यभुजनम् ।
इन्द्राणां देवमूर्त्तीनां विभुमूर्त्तिमहारौद्रम् ॥
वरुण त्वं महादेवस्त्वं विष्णुमत्स्यशरीरम् ।
देवदेव प्रणमेऽहं सर्वजगन्नमस्कारम् ॥
अर्चनं समुद्र दिव्यं जलमूर्त्तिविभुलोकम् ।
20 दीर्घायुष्यप्रणता त्वं सर्वमरणदुर्जनम् ॥
मत्स्याधिप महावीर्य वरुणदेव महारौद्र ।
मृतभूमिशुद्ध नित्यं सर्वजगन्नमस्कारम् ॥

मृतभूमिसमुद्रं च चन्द्राधिपं मृतदेवम् ।
जगतां जीवसम्पूर्णं सर्वविषविमोक्षणम् ॥
पातालं सर्वदेवं च कूर्मनाग अग्निरूपम् ।
नुग्रहं जगतां देवं मृतभूमिमहासिध्यम् ॥
5 आकाशं निर्मलं देवं चिन्त्यमूर्त्तिभूमान्तरम् ।
मृतकमण्डुलदिव्यं जगतां प्रतिष्ठानन्तम् ॥
समुद्रगिरिमूर्त्तीनां सर्वदेवातिदेवता ।
ब्रह्मा विष्णुमहेश्वरं शिव सदाशिव देवम् ॥

ॐ ॐ अं अं मं यं अं उं मं ॐ ॐ श्रेयो भवतु ॐ 10 पूर्णं भवतु ॐ सुखं भवतु ।

वायुस्तवः ।

म

ॐ प्राणो वायुमूर्त्तिनाम मुखस्थानं प्रतिष्ठा सिद्धियोगवद्यं वज्रे सर्वमन्त्रसिद्धौ पूजा । अपानो वायुमूर्त्तिनाम पुरुष्यप्रतिष्ठालिङ्गं सर्वाभिचारमोक्षणं विघ्नदोषविनाशनं नमः स्वाहा । समानो वायुवीर्यनाम प्रतिष्ठा 15 नानामुल्यानां सर्वविघ्नविनाशनं सर्वपापविमूर्छनम् । उदानो वायुमूर्त्तिनाम अनन्तासनप्रतिष्ठा सर्वक्लेशविनाशनं रोगपातकनाशनं नमः स्वाहा । व्यानो वायुमूर्त्तिनाम सर्वसन्धिप्रतिष्ठा सर्वदुर्गविनाशनं सर्वकालिकाविचित्रम् । नागो वायुमूर्त्तिवीर्यं वाक्यप्रतिष्ठास्थानं सर्व- 20 व्याधिविसर्जनं दुःखरोगा विमूर्छन्ते । कूर्मो वायुवीर्य-

नाम गुह्यप्रतिष्ठा लिङ्गं सर्वशत्रुविनाशनं सर्वरोग-
विमोचनम् । कृकरो वायुमूर्त्तिनाम सर्वमरणविच्छिन्नं
मृत्युकालान्तकरौद्रं भुजप्रतिष्ठानं लिङ्गम् । [देव]दत्तो
वायुमूर्त्तिर्लिङ्गं पदतोश्च प्रतिष्ठानं सर्वभूतविनाशनं सर्व-
5 कालविमोचनम् । धनञ्जयो वायुकृतं दशात्म दशप्रमाणं
सर्वाङ्गयमशरीरं विभु विय देवतात्मकम् । ॐ सिद्धि
स्वस्ति नमः स्वाहा ।

वासुकिस्तवः ।

ॐ गिरिमूर्त्ति महावीर्यं महादेवप्रतिष्ठा लिङ्गं
सर्वदेवप्रणम्यं सर्वजगत्प्रतिष्ठानं जगद्विघ्नविनाशनं रोग-
10 दोषविमूर्छनं जगत् हिलि रोगपथ्यं सर्वक्रियाविषशुद्धं
देवदेवमहासिद्धं मृतसञ्जीवनीपुण्यं अशुद्धक्लेशदुःख च
चं सर्वमरणमोक्षणम् । ॐ गिरिदेवीगङ्गाग्रेष्ठ नर्मदा-
सलिलानुग्रहं त्रिलोकजीवं मृतभूम्यनुग्राहकम् । ॐ
श्रेयो भवतु । ॐ पूर्णं भवतु स्वाहा ।

विष्णुस्तवः ।

15 ॐ श्रीविष्णुपञ्जरं नित्यमभेद्यं दुष्टवारणम् ।
उग्रतेजो महावीर्यं सर्वशत्रुविनाशनम् ॥
त्रिपुरं दह्यमानं तु ब्राह्मणं ईश्वरं कृतम् ।
तदहं सम्प्रवक्ष्यामि आत्मरक्षावहं सदा ॥

पादौ रक्षतु गोविन्दो जङ्घाभ्यां च त्रिविक्रमः।
उर्वन्तं केशवो रक्षेद्रक्षेज्जुह्यं तथा हरिः॥
उदरं पद्मनाभश्च कटिं चैव जनार्दनः।
नाभिकमच्युतो रक्षेत् पृष्ठं रक्षतु माधवः॥
5 वामपार्श्वे स्थितो विष्णुर्दक्षिणे मधुसूदनः।
बाहुङ्गौ वासुदेवश्च नरसिंहो हृदि स्थितः॥
कण्ठं रक्षतु वराहः कृष्णश्च मुखमण्डलम्।
माधवः श्रोत्रसंस्थितो हृषीकेशश्च नासिके॥
नेत्रे नारायणो रक्षेल्ललाटं गरुडध्वजः।
10 कपोले वैनतेयश्च केशवो शिरसोत्थितः॥
अनन्तः सर्वं रक्षतु प्रतिष्ठेद्विष्णुपञ्जरम्।
विष्णुपञ्जरविष्टोऽहमात्मरक्षावहं सदा॥
ॐ पूर्वं स्यात्पुण्डरीकाक्षः आग्नेये श्रीधरस्तथा।
दक्षिणे चक्रपाणिश्च नैर्ऋत्यां च दमोदरः॥
15 पुरुषोत्तमं वारुण्यां वायव्यां पीतवाससम्।
गदाधरं च कौवेर्यां ऐशान्यां शङ्खमादिशेत्॥
पातालं कूर्मो रक्षतु आकाशं च सुदर्शनः।
स नित्यं सर्वगात्रेषु प्रतिष्ठेद्विष्णुपञ्जरम्॥
विष्णुपञ्जरविष्टोऽहं विचरामि महीतले।
20 राजद्वारे पदे घोरे सङ्ग्रामे शत्रुसङ्कटे॥
नदीषु कान्तारे चैव व्याघ्रे चैव भयावहे।
डाकिनीभूतप्रेतेषु भयं नास्ति कदाचन॥
अपुत्रो लभते पुत्रं धनहीनो धनं लभेत्।
मुच्यते सर्वपापेभ्यो विष्णुलोकं सदाऽश्नुते॥

ॐ ॐ विष्णवे नमः । ॐ विष्णुपञ्जरं क्रीडानां पद्म उत्तरं सप्तलोचनद्रियद्रियं पद्मानां पद्म उत्तरं विष्णुक्रीडिदुर्गमय विष्णुमूर्त्तिभूतमय क्रीडानां पद्म उत्तरम् । ॐ श्रीविष्णवे नमः स्वाहा ।

विष्णुस्तवः ।

5 ॐ नमोऽस्तु पुरुषोत्तमाय परमरिपुपरपुरहरण-
पराक्रमाय परमबलभटोलटोललोलितगलितमहाबलाय
च जाग्रत्सुप्ततूर्यचतुर्भुजाय नारायणाय नरसिंहवामनाय
नारायणार्दनाय नरगदायुद्वे दानवान्तकरिपुमर्दनपाञ्च-
जन्यसुदर्शनायुधाय दैत्यदानवयक्षराक्षसपिशाचभूतगण-
10 धरधरणीधरधीरदराय च गन्धर्वमधुरगीतसुरविद्याधर-
ऋषिप्रभृतिसेविताय च परमरिपुरावणार्जुकधेनुकप्रलम्ब-
केशराविष्टकमेनिगजबलतुरगमिसस्तृगालादिनिधनाय च
पुरुषोऽनन्तसमुद्राश्रयः खगवरवरेन्द्रः श्रीप्रियो धनदप्रियो
वैश्रवणाङ्कोऽस्मान् रक्षतु अस्मान् गोपयतु स्वाहा ।

शिवस्तवः ।

15 ॐ नमः शिवाय शर्वाय देवदेवाय वै नमः ।
रुद्राय भुवनेशाय शिवरूपाय वै नमः ॥
त्वं शिवस्त्वं महादेव ईश्वरः परमेश्वरः ।
ब्रह्मा विष्णुश्च रुद्रश्च पुरुषः प्रकृतिस्तथा ॥

त्वं कालस्त्वं यमो मृत्युर्वरुणस्त्वं कुवेरकः ।
इन्द्रः सूर्यः शशाङ्कश्च ग्रहनक्षत्रतारकः ॥
पृथ्वी सलिलं त्वं हि त्वमग्निर्वायुरेव च ।
आकाशं त्वं परं शून्यं सकलं निष्कलं तथा ॥
5 असुराणां पतिस्त्वं हि देवानां त्वं पतिस्तथा ।
उमापतिः पशुपतिर्देवानां सदसःपतिः ॥
उमाङ्गे संस्थितो यश्च कर्त्ता हर्त्ता करोति यः ।
त्वमेव देवदेवेशः कर्म कृत्वा महाशिवः ॥
अभक्षभक्षणश्चैव सुरापानमदान्वितः ।
10 युवतीरतिसंयुक्तः सन्ध्याभ्रष्टे तु संयुतः ॥
एतानि सर्वकर्माणि यः करोति महाशिवः ।
अस्य हि ताण्डवं नृत्तं युद्धं च कमनं तथा ।
कफमेदयुतञ्छुक्रं पुरीषमूत्रसंयुतम् ॥
एतानि सर्वकर्माणिः यः करोति महाशिवः ।
15 अशुचिर्वा शुचिर्वाऽपि सर्वकामगतोऽपि वा ।
चिन्तयेद्देवमीशानं स बाह्याभ्यन्तरः शुचिः ॥
नमस्ते देवदेवेश ईशान वरदाच्युत ।
मम सिद्धं भूयश्च स्वं सर्वकार्येषु शङ्कर ॥
नमस्ते देवदेवेश त्वत्प्रसादाद्वदाम्यहम् ।
20 वाक्ये हीनेऽतिरिक्ते वा मां क्षमस्व सुरोत्तम ॥

यस्तिष्ठन् व्याप्तविश्वस्तनुकरचरणैश्चक्षुसा यो नरेन्द्रै-
स्तिर्यग् मूर्त्त्या सभानामवनितलगतो मानुषाणां च संस्थः ।
जाग्रत्स्वप्नं सुषुप्तं शुभवहमभयं सर्वयोर्यं च तूर्यं
तूर्यं तं शून्यमेकं सततितिमिरतः प्रोच्यते ज्ञायते च ॥

शिवस्तवः ।

ॐ शिवः कर्त्ता शिवो धाता शिवो दत्तवरप्रदः ।
शिवो रक्षतु मां नित्यं शिवाय च नमोस्तु ते ॥
शिवो भोक्ता शिवो भोग्यं दासकं च शिवात्मकम् ।
यजमानः शिवश्चापि मां रक्षतु नमोऽस्तुते ॥
5　शिवः सञ्जयरूपश्च शिष्यमूर्त्तिः शिवस्तथा ।
शिवो ज्ञानप्रदो नित्यं मां रक्षतु नमोऽस्तु ते ॥
शिवो ब्रह्मा शिवो विष्णुर्महादेवः शिवस्तथा ।
शिव इन्द्रो वरुणश्च मां रक्षतु नमोऽस्तु ते ॥
शिवो यमः कुवेरश्च शिवः सूर्यश्च चन्द्रमाः ।
10　अङ्गारकः शिवश्चापि मां रक्षतु नमोऽस्तु ते ॥
शिवो बुधो गुरुश्चैव शुक्रश्चापि शिवस्तथा ।
शनैश्चरः शिवश्चैव मां रक्षतु नमोऽस्तु ते ॥
राहुः केतुः शिवः प्रोक्तो नवग्रहशरीरकः ।
नवशक्तिसमायुक्तो मां रक्षतु नमोऽस्तु ते ॥
15　पूर्वदक्षिणसंज्ञेयाः पश्चिमोत्तरमध्यतः ।
अध ऊर्ध्वं शिवश्चापि मां रक्षतु नमोऽस्तु ते ॥
शिवोऽग्निर्नैर्ऋतिर्वायुरैशान्या शिवसंज्ञका ।
सत्यं धर्मः शिवश्चापि मां रक्षतु नमोऽस्तु ते ॥
कालो मृत्युस्तथा क्रोधो विश्वकर्मा हरिस्तथा ।
20　सर्वदेवं तु तत्सर्वं मां रक्षतु नमोऽस्तु ते ॥
चतुर्विंशवियत्त्वं च शिवाङ्गं च प्रधानकम् ।
पुरुषश्चामरो यगः कलाविद्या शिवस्तथा ॥

अष्टत्रिंशकपञ्चाशत्पञ्चत्रिंशकसंयुतम्।
शिवाङ्गमिति तत्सर्वं मां रक्षतु नमोऽस्तु ते ॥
अष्टमूर्त्तिः शिवश्चापि अष्टपत्निः शिवस्तथा।
सर्वः शिवगणश्चैव मां रक्षतु नमोऽस्तु ते ॥
5 भूतयक्षपिशाचका राक्षसाश्चापि दानवाः।
नदीनदसम्भवाश्च गिरिजाश्च समुद्रजाः ॥
लतावृक्षसमुत्पन्ना निर्झरस्थलसम्भवाः।
सर्वः शिवगणश्चैव मां रक्षतु नमोऽस्तु ते ॥
विषस्थानास्तु ये सर्वे सरीसृपपिपीलिकाः।
10 सर्वः शिवगणश्चैव मां रक्षतु नमोऽस्तु ते ॥

ॐ ॐ कर्णद्वयं शिवरुद्रं एकस्तु सदाशिवः नमो नमः स्वाहा।

श्रीस्तवः।

स्रु

ॐ श्रीदेवी महावक्त्रा चतुर्वर्णा चतुर्भुजा।
प्रज्ञावीर्यसारज्ञेया चिन्तामणिकुरुस्मृता ॥
15 श्रीदेवी सततं मूर्ध्ना त्वां च नमामि शक्तितः।
दनिक्सुस्तु महाभक्त्या ज्ञातुं अर मम स्तुतिम् ॥
श्रीशालिकान्तरूपा त्वं स्निग्धगात्रं च ताण्डुलम्।
ददासि मे सदा चित्रं सौभाग्यं लोकपूजितम्[1] ॥
श्रीताण्डुली[2] महादेवी श्रीमल्(त्?)कमलशोभिता।
20 ददासि मे महाभोग्यं सर्वद्रव्यहितं धनम् ॥

---

[1] Ślokas 2 and 3 missing in B.   [2] श्रीचण्डुली.

श्रीव्रीहिमुक्ताजीवा त्वं सर्वभूपनन्दनी ।
ददासि मे सुखं नित्यं जीवितं धातुकाञ्चनम्[1] ॥
श्रीधान्यराज्ञी[2] त्वं देवी प्राण[3]स्ताण्डुलसंज्ञकः ।
मही रत्नसभास्थिता[4] सर्वरत्नगुणान्विता ॥
5 ब्रह्मादिस्तम्भपर्यन्तं जगत् स्थावरजङ्गमम् ।
शिवाङ्गमिति तत्सर्वं मां रक्षतु नमोऽस्तु ते ॥
श्रीधनदेविका रम्या सर्वरूपवती तथा ।
सर्वज्ञानमणिश्चैव[5] श्रीश्रीदेवि नमोऽस्तु ते ।

ॐ ॐ श्रीब्रह्मात्माय नमः स्वाहा। ॐ हुं श्रीविष्णव-10 न्तरात्मने नमः स्वाहा । ॐ मं श्रीईश्वरपरमात्मने नमः स्वाहा । ॐ चं श्रीमहादेवनिरात्मने नमः स्वाहा । ॐ श्रीबुद्धात्यात्मने नमः स्वाहा । ॐ श्रीधर्मनिष्कलात्मने नमः स्वाहा । ॐ श्रीसङ्घशून्यात्मने नमः स्वाहा ।

भट्टारीसरस्वतीस्तुतिः ।

श्रु

ॐ सरस्वति नमस्तुभ्यं वरदे कामरूपिणि ।
15 सिद्धिरद्धिं[6] करिष्यामि सिद्धिर्भवतु मे सदा ॥
प्रणम्य सर्वदेवांश्च परमात्मानमेव च ।
रूपसिद्धिप्रयुक्ता या[7] सरस्वती नमाम्यहम् ॥

---

[1] Śloka missing. [2] दद्यभज्य. [3] प्रज्ञस्. [4] मणिरत्नदनततं.
[5] सर्वज्ञकमितिदत्यं. [6] सिद्धारभं करलणि. [7] रूपसिद्धिकरी चभत्.

सुभागत्वेश्वरी देवी चतुर्भुजा चिलाञ्छना।
सर्ववन्दनरक्षी त्वं अधुना ते सुकालकः॥
सुलभा त्वां स्वरमन्त्रैरभेजं फलकं परम्।
सर्वक्लेशविनाशनं सन्ति त्वं सङ्गतोत्मना॥
5 अचिनीरसहस्राणां सर्वरोगविनाशनम्।
तं मम सर्वं सिध्यतु सर्वकार्यप्रसिद्धये॥

ॐ सं सरस्वति श्वेतवर्णायै नमः स्वाहा। ॐ बं सरस्वति रक्तवर्णायै नमः स्वाहा। ॐ तं सरस्वति पीतवर्णायै नमः स्वाहा। ॐ अं सरस्वति कृष्णवर्णायै 10 नमः स्वाहा। ॐ इं सरस्वति विश्ववर्णायै नमः स्वाहा।

After the first two ślokas, B goes on thus:

पद्मपत्रविमलाक्षि पद्मकेसरवर्णिनि।
नित्यं पद्मालये देवि तुभ्यं नमः सरस्वति॥
ब्रह्मपुत्रि महादेवि ब्रह्मण्ये ब्रह्मनन्दिनि।
15 सरस्वति संज्ञायनि प्रयनय सरस्वति॥
काव्यं व्याकरणं तर्कं वेदशास्त्रपुराणकम्।
कल्पसिद्धीनि तन्त्राणि त्वत्प्रसादात् करोक्षभेत्॥

सर्वज्ञमास्तुतिः।

आ

यत्कृतं किञ्चिन्मया मुमुनधिया मुनः।
तत् क्षन्तव्यं त्वया नाथ यतस्तनोषि देहिनः॥

अप्रत्यादिपरिज्ञानादशक्यवस्तुभावतः ।
कृपाकारिकमित्यस्तु सर्वञ्च सुखसाधनम् ॥
धर्मधातोरधिष्ठानात् समयस्मरणादपि ।
कृताय सर्वसत्त्वार्थं कुरु त्वं सर्वसिद्धये ॥

5 ॐ यथा भूर्भुवः स्वः स्वाहा । अं ॐ दशदिगन्तराल हुं फट् । ॐ भवेद्दिवशरीरददा रक्षसि मे धर्मा कुं कुमार क्षमासम्पूर्णाङ्गमनोहराय नमः स्वाहा ।

सर्वसिद्धिस्तुतिः[1] ।

अ

श्रीमाररोग सत्त्वार्थ श्रीडडिबलिमण्डल ।
पूर्वमोक्ष सर्वसिद्धि महाज्ञान नमोऽस्तु ते ॥
10 श्रीगुरुपादम्पु तुहु श्रीआर्यगुरु म्पु शुद्ध ।
मित्राणां महामोक्षणं इबलिज्ञ तमोऽस्तु ते ॥
श्रीभदन्तगुणराशि श्रीआर्यगुरुमुत्तमम् ।
शिष्यगणसुमयनं इतुङ्कुल नमोऽस्तु ते ॥
श्रीप्रज्ञाधर्मपण्डिता आर्यगुरु महाफल ।
15 बलविद्या महाधर्म इकम्बङ्गन् नमोऽस्तु ते ॥
श्रीआर्यगुरुपादेन इङ् अग्निमहामण्डल ।
सुतीक्ष्णबुद्धिसंसिद्धः नमो सिद्धि नमोऽस्तु ते ॥

---

[1] A typical blending of Sanskrit and vernacular words in the shape of quasi-ślokas.

श्रीनखरसम्बुद्धः पेगघशनपूजन
श्रीकेतुधररत त्वं कनिगर नमोऽस्तु ते ।
श्री आर्यबहुला भद्रा इमकु द्वादशमोक्षम् ॥
श्री आर्यगण्डित सूर्य कपुलुङ्गन् नमोऽस्तु ते ।
5 श्री आर्यगुरुसुमित्र चक्र पदश चतुर्थम् ॥
श्रीगुरुपादरि रागं पञ्चदशि नमोऽस्तु ते ।
श्री आर्यम्पु सुदर्शन्ती पङ्कज आत्ममण्डल ॥
श्री आर्यदेव शुद्धन पगुमूल नमोऽस्तु ते ।
श्री आर्यगुरु सि बुद्ध पङ्केकेतन महात्मनम् ॥
10 श्री आर्यगणगर्भं शितिलेवक नमोऽस्तु ते ।
श्री आर्यगुरुप्रदीप्त वज्रपुरमहाभिक्षु ॥
नरशिष्य महामन इमिगयु नमोऽस्तु ते ।
श्री आर्यगुरुदङ्गन्द्रा मुखवर्णदमण्डल ॥
श्री आर्यगुरुपादेन गुरुपाद नमोऽस्तु ते ।
15 सिरश्री आर्यहम्बन्तो देवशिष्य महाफल ॥
अन्तकदेवीजुतपुच महायान समतृष्णासमज्ञान ।
वज्रपण्डि नमोऽस्तु ते - - - - - - - - - ॥
सिरश्री सङ्घार्यवज्र गुरुपाद महाज्ञान ।
सिरश्री गगनवज्र ब्रह्मभिक्षु नमोऽस्तु ते ॥

सूर्यस्तवः ।

20 ॐ रक्तवर्ण महातेजः श्वेतपद्मोपरिस्थित ।
सर्वलक्षणसम्पूर्ण सर्वाभरणभूषित ॥

द्विभुजं एकवक्त्रं च सौम्यपङ्कजधृत्करम् ।
वर्त्तुले तेजोबिम्बे तु मध्यस्थं रक्तवाससम् ॥
आदित्यस्य त्विदं रूपं शुचिसत्त्वजितेन्द्रियम् ।
त्रिकालं यः स्मरेत्कोन्द्र एकचित्ते व्यवस्थितः ॥
5 सोऽचिराद्भवति लोके वित्तेन धनदोपमः ।
मुच्यते सर्वरोगैस्तु तेजस्वी बलवान् भवेत् ॥
हृदयास्था शिरश्चैव शिखापमास्त्रलोचनम् ।
रक्तवर्णास्त्विमे सौम्याः सर्वाभरणभूषिताः ॥
वरदपद्महस्तास्तु ध्यातव्याः साधकेन तु ।
10 विद्युत्पुञ्जिनिनं स्तोत्रं उग्रदंष्ट्रा कालिनी ॥

सूर्यस्तवः (द्वादशादित्यस्तवः) ।

श्रु

ॐ नमामि शिरसा सूर्यं सप्तलोकनमस्कृतम् ।
दीप्तमन्त्रं महावीर्यं ज्ञानवन्तं शिवात्मकम् ॥
वक्ष्येऽहं नामतः सम्यग्व्यासेन परमं शिवम् ।
मासे मासे यथोत्पन्नं तदेव शृणु मे पुनः ॥
15 अरुणो माघमासे च विवस्वान् फाल्गुने स्मृतः ।
चैत्रे मासे भवेदंशुर्भानुर्वैशाख एव च ॥
ज्यैष्ठे मासे भवेदिन्द्र आषाढे अर्यमा स्मृतः ।
भगस्तिः श्रावणे मासे यमो भाद्रपदे तथा ॥
पर्जन्यश्चाश्विने मासे कार्त्तिके च दिवाकरः ।
20 मार्गशिरे स्यान्मित्रश्च पौषे विष्णुः स्मृतस्तथा ॥

इत्येते द्वादशादित्या नामतः परिकीर्त्तिताः ।
मासेभ्यो द्वादशादिभ्यो नमस्कारं करोम्यहम् ॥
आदित्यस्तवनं दीप्तं यो नरः कथयिष्यति ।
त्रिकालमेककालं वा शिवभक्तिसमाश्रितः ॥
5 आदित्यस्तवनं प्रोक्तं यो नरः पठते सदा ।
यद्यत्प्रार्थयते सम्यक् सदाऽऽप्नोति स मानवः ॥
मोक्षार्थी लभते मोक्षं स्वर्गार्थी स्वर्गमाप्नुयात् ।
पुत्रार्थी पुत्रमाप्नोति भोगार्थी भोगमाप्नुते ॥
जयार्थी जयमाप्नोति यशोऽर्थी लभते यशः ।
10 बद्धो विमुच्यते बन्धाद्रोगो रोगात्प्रमुच्यते ॥

सूर्यानन्दस्तुतिः ।

श्रु

सूर्यानन्दनमीश्वरमन्नतादिमहेश्वरं ऋषि कुकुविद्याक्षरं अक्षोभ्यबुद्धदेवं च नरसिंहब्रष्टदेवं सङ्गमविजयभैरवं कस्तुरि ऋषि सयक रत्नसम्भवमहाबुद्धं बुद्धधर्मधर्मकं साबनीरमभैरवं सुखयज्ञो महर्षिं अमिताभं महाबुद्धं 15 तम्बो विष्णु अन्धकारं तिम्बुर महाभैरवं श्रीकेशवमहर्षिं अमोघसिद्धिमहाबुद्धं शिवशून्यधर्मकं सदानिर्वाणभैरवं श्रीपिङ्गलमहर्षिं वैरोचनमहाबुद्धम् ।

ॐ ॐ अक्षोभ्य सूर्यदेव महागङ्गायै नमः स्वाहा । ॐ ॐ रत्नसम्भव सूर्यदेवमहागङ्गायै नमः स्वाहा । ॐ

ॐ अमोघसिद्धि सूर्यदेवमहागङ्गायै नमः स्वाहा । ॐ
ॐ वैरोचनसूर्यदेव महागङ्गायै नमः स्वाहा ।

इति सूर्यानन्दस्तुतिः । ध्रुवऋषिः ।

सोमस्तवः ।

ॐ । चन्द्रमण्डल सम्पूर्ण चन्द्रोऽयं ते प्रशंस्यते ।
5 चन्द्राधिप परं ज्योतिर्नमश्चन्द्र नमोऽस्तु ते ॥
सिद्धिराग नमोऽस्तु ते दगोपतिपदनम् ।
बिसत्सत्यहारान्वित नमश्चन्द्र नमोऽस्तु ते ॥
कर्मशक्ति जगच्चक्षुः सर्वाभरणभूषित ।
श्वेतपञ्चकलारूण नमश्चन्द्र नमोऽस्तु ते ॥
10 कर्मदक्ष जगच्चक्षुः सर्वाभरणभूषित ।
श्वेतपञ्चकलारूण नमश्चन्द्र नमोऽस्तु ते ॥
कुमुदोत्पलहस्तं च शार्वरीदीपमङ्गलम् ।
धर्माधर्माश्रयं पश्यन् नमश्चन्द्र नमोऽस्तु ते ॥
लोकोऽयं ते प्रकाशितो लोकपूजा समर्पिता ।
15 - - - - - - - - - - - नमश्चन्द्र नमोऽस्तु ते ॥
अष्टदीक्षारमे नित्यं अष्टदीपमसीकरम् ।
अष्टाहकलासम्पूर्ण नमश्चन्द्र नमोऽस्तु ते ॥
शिवलोकं चन्द्राधिपं[1] - - - - - - - - ।

---

[1] This pāda probably to be shifted above, in the place of the missing pāda.

स्मरस्तवः-सदम्पतिस्तवः ।


ॐ अनङ्गतर्पिणी पत्नी पुष्पेषुमण्डिनी तथा ।
काम दनोवती पत्नी मदनी मदनस्तथा ॥
मनोभवः शोभनी च श्रीमती मकरध्वजः ।
कन्दर्पः सोमवती च श्रीजयिनी च मन्मथः ॥
5 कामदेवो रतिः पत्नी श्वेतरी स्मर एव च ।
अतनुर्दनारिपत्नी मनसिजश्च तारिणी ॥
ॐ कामदेवं पीतवर्णं गुरुद्वयं स्थिरकस्थम् ।
शुक्लाधिपतीशानं संघराजोपहोत्तमम् ॥
आकाशं नात्मकं देवं बिन्दुनादात्मकात्मकम् ।
10 सर्वपापप्रहरणं सर्वकार्यप्रदायकम् ॥
मोक्षप्रदं प्रकाम्यं च निःसन्देहं निरिश्चैव ।
निर्योगो निर्वियोगश्च सर्वदेशे विततस्त्वम् ॥
प्रत्यक्षस्त्वमिह लोके मानुषस्त्वं च देवस्त्वम् ।
सूक्ष्मस्त्वं सकलस्त्वं च आत्मा त्वं च शरीरं त्वम् ॥
15 एकरूपं चाविशेषं हृद्देवीसुखसाधनम् ।
चन्द्रवत्सततमेकं त्रैलोक्यविजयः शक्तिः ॥
ईश्वरवरदेवश्च ब्रह्मजयश्च विजयः ।
महादेववरस्त्वं च विष्णुविजय एव च ॥
इन्द्रराजा च जयस्त्वं सर्वदेवसेवितस्त्वम् ।
20 त्रैलोक्यसेवितस्तथा - - - - - - - - - - ॥
चिन्तामणिमहेन्द्रश्च सर्वकुमारराजा त्वम् ।
सर्वदेवीसेवितस्त्वम् - - - - - - - - - - ॥

সুমন্ত্রিসংজ্ঞাদিশ্চৈব ইষ্টকামস্য যাজকম্।
অষ্টতন্বধিপতিশ্চ উগ্রদেবস্য সংজ্ঞানম্॥
সর্বপাপং হরেৎসিদ্ধি হে দেব কুমাররাজ।
সর্বরোগপ্রহরণং সর্বশত্রুবিনাশনম্॥

Sanskrit Texts from Bali

III.

Buddhaveda.



बुद्धवेदः ।

इन्द्रशून्यमहामृतं गुरुशून्यमहामृतम् ।
पवित्रमहामृतं च स्मर महाशुचि निङ्वे ॥
निर्मले निर्बुद शून्य वरद महापवित्र ।
निक्षितिमहापद्माय सूक्ष्मतय महामृतम् ॥
5 सप्तशून्य महासूक्ष्म पवित्रं महानुक्षणम् ।
सर्वभुक्तिमहामृतं सूक्ष्मामृतं महा इनम् ॥
निर्विघ्नं निर्मलं शून्यं सर्वपापमोक्षंकरम् ।
निःस्वरं शून्यधर्मं च सूक्ष्ममूर्त्तिमहामृतम् ॥
शून्य निर्मलानुक्षणं सप्तयोगमोक्षंकरम् ।
10 अनुक्ष सर्वकान्ताय एकस्थान महाशून्य ॥
निर्विघ्नं निर्मलं शून्यं सर्वपापमोक्षंकरम् ।
निर्युक्तिरोगशून्यदं सर्वशत्रुमोक्षंकरम् ॥
अं अः सूक्ष्मवेदानुष्ठान गङ्गा नमः स्वाहा ।
ॐ अः सूक्ष्मचतुःप्रणवामृतानुष्ठानगङ्गायै नमः स्वाहा ।
15 भट्टारसाधकबुद्ध...भट्टारदिवरूप भट्टार बुद्ध...भट्टार वैरोचन भट्टार शिव...शिवाग्निशक्ति...रुद्र...भट्टाराग्निजय ।
ॐ अः अचिन्त्यनिर्वाणामृतानुष्ठान गङ्गा नमः स्वाहा ।
अं अः अज्ञानगङ्गा नमः स्वाहा ।
20 गणिची महासूक्ष्मं च पवित्रं महानुक्षणम् ।
सर्वयोगमहामृत सर्वशुचि निर्मल स्वाहा ॥

श्रीसाधन महासूक्ष्म सर्वधर्म महाशून्य ।
सर्वमूल महाशून्य सर्वसारि महामृत ॥
नमो बुद्धाय ।
अं अः ॐ अनन्तासनाय नमः ।
5 ॐ भूर्भुवःस्वर्नमः ।

ॐ तत्पुरुषाय नमः... ॐ फट् पच नमः... ॐ हरगोय नमः... ॐ बं ब्रह्मदेवाय नम... ॐ सं साध्याय नमः ...ॐ भं हृदयाय नमः... ॐ स ब त इ नमः शिवाय
हुं अः ॐ... त्रिकायमण्डलपरिशुद्ध नमो बुद्धाय
10 अं अः ॐ स्वभावशुद्ध ।

गङ्गादेवी मामकी...ज्वालामण्डल...प्रतिसर...प्रज्ञा-पारमिता...पृथिवीशरीर...यकार...पूर्वेश्वर...सरस्वती ...नमस्ते भगवन्नग्ने...गिरिपति...श्रीदेवी...परमशिव ...दीर्घाय...स्तम्भमेरु...ततः आर्य...ततः द्विजा...
15 गङ्गादेवी...यत् क्षत नकारो...श्वेत वैरोचन...वज्रयन्तु ...अष्टामहाभय... ।

ॐ भट्टारी गङ्गा... ॐ लब्धवरचिन्तामणि ।
ॐ आयुर्वृद्धिर्यशोवृद्धिर्वृद्धिः प्रज्ञासुखश्रियाम् ।
धर्मसन्तानवृद्धिश्च सन्तु ते सुखवृद्धये ॥

20 उं इन्द्राय विशोधनाय स्वाहा... ॐ जीवमल-विशोधनाय स्वाहा... ॐ अमृताय नमः स्वाहा ।

अङ्गुलीशोधन... ॐ वज्रचित्त चित्तशोधन ॐ अन्यो-न्यानुगताः सर्वधर्माः अन्योन्यानुप्रविष्टाः सर्वधर्माः ॐ परस्परानुप्रविष्टाः सर्वधर्माः ॐ अत्यन्तानुगताः सर्वधर्माः

अत्यन्तानुप्रविष्टाः सर्वधर्माः...ॐ नजिजातिकायै ज्योतिःप्रभायै स्वाहा ॐ ग्रे हुं वज्राशये हुं फट् हुं तं हुं।

शयनं निर्मलं शुद्धं सर्वबुद्धैरधिष्ठितम्।
नरितं सर्वभावेन बुद्धबोधौ वराप्तये॥
5 प्रणम्य सततं बुद्धान् आदिबुद्धनमस्करान्।
सत्त्वासत्त्ववपुर्व्यक्तान् वक्ष्ये वक्ष्ये धनं परम्॥
वैरोचनं विभूषणं सकलभवकारणम्।
आदिनाथं परं दक्षं प्रणमामि तथागतम्॥
अयं तु सर्वबुद्धाग्रः सिद्धीनां प्रदयस्तथा।
10 तथा स्वान्यप्रकुर्वितः मया मण्डलकर्मणा॥
गुरुपादनमस्कारं गुरुपादुकमेव च।
परमगुरुपादुके ज्ञानसिद्धिमवाप्नुयात्॥
अं अः ऊं जिनजित् बुद्धलोचनाय स्वाहा...।

नमो भगवत्यै आर्यप्रज्ञापारमितायै अपरिमितगुणायै 15 सर्वतथागतज्ञानपरिपूरायै तद्यथा हं देवशुद्धि म ऊं श्रुतिविजय स्वाहा ॐ भृकुटिपरमसुभगे स्वाहा।

स्वरव्यञ्जन अ आ इ ई उ ऊ ऋ ॠ ऌ ॡ क ख ग घ ङ प फ ब भ म य र ल व च छ ज झ ञ श स ह त थ द ध न अक्षोभ्य रत्नसम्भव अमिताभ अमोघ- 20 सिद्धि वैरोचन।

उष्णीषे वैरोचनको हृदायामक्षोभ्यस्तथा।
गुलुह्यां रत्नसम्भवो ललाटे अमिताभश्च॥
मूर्धामोघसिद्धिस्तथा उष्णीष बोधिह तथा।
धर्म कल्तक अनन्य आर्यसङ्घहृद्धायां च॥

ॐ सर्वतथागतयोगालङ्कार पूजामेघसमुद्रपारणसमय हुं ॐ अमृतकुण्डलि विघ्नान्तकाय हुं डट् रजोबहुला येन सत्त्वा ते सर्वे बुद्धबोधिसत्त्वा सर्वे बुद्धाः सत्त्वानुरक्ता बुद्धा भवन्तु तेन सत्त्वेन वाक्येन रजो ज्वलंतु । ऊं सर्व-
5 तथागतगण्डानुलेप स्वाहा ।

श्वेतवर्णा श्वेतपुष्पा श्रीश्री देवि नमोऽस्तु ते ।
नीलवर्णा नीलपुष्पा " " " " " ।
पीतवर्णा पीतपुष्पा " " " " " ।
रक्तवर्णा रक्तपुष्पा " " " " " ।

10 सर्वबुद्धबोधिसत्त्वेभ्यः दशदिगन्तपर्यन्तलोकधातुव्यव-स्थितेभ्यः अतीतानागतप्रत्युत्पन्नेभ्यः नमो भगवते श्रीवैरो-चनाय तथागताय अर्हते सम्यक्सम्बुद्धाय शाश्वतज्ञानाय शुद्धवर्णाय वज्रपर्यङ्कप्रतिष्ठानाय बोध्यग्रीमुद्रानिबन्धनाय सिंहासनसंस्थिताय सहवतीलोकधातुव्यवस्थिताय सर्व-
15 देवगणपूजिताय सर्वोपद्रवशान्तिकराय नवनवाय क्रुद्धाय सत्त्ववज्रि रत्नवज्रि धर्मवज्रि कर्मवज्र्यादिबोधिसत्त्वपरि-वाराय तद्यथा अः सूक्ष्मे २ शान्ते २ दान्ते २ निराकुले यशोयशोवति तेजस्तेजोवति सर्वतथागतसर्वबोधिसत्त्वाधि-ष्ठानाधिष्ठिते स्वाहा ।

20 नमो भगवते श्रीअक्षोभ्याय तथागतायार्हते सम्यक्-सम्बुद्धाय आदर्शज्ञानाय वज्रपर्यङ्कप्रतिष्ठानाय भूस्पर्श-मुद्रानिबन्धनाय कुञ्जरसिंहासनसंस्थिताय अभिरतवती-लोकधातुव्यवस्थिताय यमराजनमक्रोधाय सर्वसत्त्वदुर्दान्त-धर्मकराय वज्ररागवज्रसाधुवज्रराजवज्रधरादिबोधिसत्त्व-

परिवाराय तद्यथा ह्रूं ह्लक्ष्मे २ शान्ते २ दान्ते २ निराकुले यशोयशोवति तेजस्तेजोवति सर्वतथागतसर्व-बोधिसत्त्वाधिष्ठानाधिष्ठिते स्वाहा।

नमो भगवते श्रीरत्नसम्भवाय तथागतायार्हते 5 सम्यक्सम्बुद्धाय आकाशज्ञानाय पीतवर्णाय वज्रपर्यङ्क-प्रतिष्ठानाय वरदमुद्रानिबन्धनाय तुरङ्गसिंहासनसंस्थि-ताय रत्नवतीलोकधातुव्यवस्थिताय सिंहवाहनमक्रोधाय सर्वसत्त्ववरदपुष्टिकराय वज्रतेजोवज्रकेतुवज्रहासवज्र-रत्नादिबोधिसत्त्वपरिवाराय तद्यथा चं ह्लक्ष्मे २ शान्ते २ 10 दान्ते . . . ।

नमो भगवते श्रीअमिताभाय तथा॰...प्रत्यवेक्षाज्ञानाय रक्तवर्णाय वज्रपर्यङ्कप्रतिष्ठानाय ध्यानमुद्रानिबन्धनाय मयूरसिंहासनसंस्थिताय सुखावतीलोकधातुव्यवस्थिताय मतनमक्रोधाय सर्वसत्त्वानुरागाय वज्रतीक्ष्णवज्रहेतुवज्र-15 भासवज्रधर्मादिबोधिसत्त्वपरिवाराय तद्यथा ह्रं ह्लक्ष्मे... ।

नमो भगवते श्रीअमोघसिद्धाय तथा॰...कृत्यानुष्ठान-ज्ञानाय विश्ववर्णाय वज्रपर्यङ्कप्रतिष्ठानाय अभयमुद्रा-निबन्धनाय गरुडसिंहासनसंस्थिताय कुसुमितालोकधातु-व्यवस्थिताय वत्सलमक्रोधाय सर्वसत्त्वाभयप्रदाय वज्र-20 रक्षवज्रयक्षवज्रसन्धिवज्रकर्मादिबोधिसत्त्वपरिवाराय तद्यथा अः ह्लक्ष्मे... ।

ॐ ॐ पञ्चमहादेवाय पूर्वदेशाय ईश्वरदेवाय गायत्री-पतये गोवाहनाय सन्ध्यामन्त्राय सर्वपापक्लेशनिर्मलाय नमः स्वाहा।

ॐ ॐ पञ्चमहादेवाय पश्चिमदेशाय महादेवदेवाय कुमारीपतये शशवाहनाय [तं]तत्पुरुषमन्त्राय सर्वपाप... ।

ॐ ॐ पञ्चमहादेवाय उत्तरदेशाय विष्णुदेवाय हरसिद्धिपतये गरुडवाहनाय अं अः देवमन्त्राय सर्व०... ।

5 ॐ ॐ पञ्चमहादेवाय मध्यदेशाय शिवदेवाय उमापतये पिशाचवाहनाय इं इः सनमन्त्राय सर्व० ... ।

श्रीवज्रसत्त्व सत्त्वार्थ सत्त्वेषु करुणात्मक ।
एकात्मनार्यभीमेन जगल्लैचि नमोऽस्तु ते ॥
हुंकारसमवस्तव भिदिर महाबल ।
10 वज्रकाय महोपाय प्रणिप्रे नमोऽस्तु ते ॥
सर्वलघुपविचाङ्ग मङ्गिष्टिरत्नकुण्डल ।
केतकीपुष्पनःश्रोते आर्यभीम नमोऽस्तु ते ॥
स्थूलाय गुणोत्तुङ्गाय स्थूलदीर्घवपुस्तिर ।
स्थूलवरकर्मेश्वाय भीमशक्ते नमोऽस्तु ते ॥
15 शूरदर द्विषां सङ्गे रणे शत्रुभयङ्कर ।
गदास्त्रेण रिपुभङ्ग भीमशूर नमोऽस्तु ते ॥
साक्षात्सहोदरक्रुद्धा गिरिदेवताजग्रया ।
कलिद्वापरसम्भूत आर्यभीम नमोऽस्तु ते ॥
प्रशस्ते जगतां चातः कल्याणभयदानक ।
20 विग्रहोष्णम्बहुपत्तो भीम भिक्षणे नमः ॥
अनयदुष्टमुखे तु जगत्तम परिपक्का ।
सतकर्मदूत्नया गत्पह नमोऽस्तु ते ॥
प्रसीद भगवन् भीम मेरकृघव यथागत ।
प्रयोजनमिदं सिध्यात् मादृवचे नमोऽस्तु ते ॥

नमो बुद्धाय नमो धर्माय नमः सङ्घाय च सण्ड सण्ड।
सत्त्वानां क्लेशबद्धानां मुक्तये वसका तथा।
नमो बुद्धाय गुरवे नमो धर्माय तायिने॥
नमः सङ्घाय महते त्रिभ्योऽपि सततं नमः।
5 नमस्त्रैलोक्यगुरवे बुद्धाय हितबुद्धये॥
- - - - - - - - - पत्यनत् सततं पतम्।
सर्वपापस्याकरणं एतद्बुद्धानुशासनम्॥

सर्वे सत्त्वाः सर्वे नुतः सर्वे व्रतिनः सुखिनो भवन्तु स्वाहा। यत्पूर्वं बुद्धमूले... (vid. p. 49)

10 नमो रत्नत्रयाय नमो बुद्धेभ्यः अतीतानागतप्रत्युत्पन्नेभ्यः नमो अमिताभाय तथागतायार्हते सम्यक्सम्बुद्धाय तद्यथा ऊं मवि २ मेधावि २ अमृतभवे २ बुद्धमति बुद्धभासिते सर्वउल्काज्वालिनि बोधि बोधि महाबोधि महावीरे वेगवति गरुडवज्रवेगवति सर्वबुद्धावलोकिते अः 15 मुनि २ महामुनि स्फय बुद्धधर्मसङ्घादिबलेन नाशय २ विनाशय २ भिन्द मुञ्च २ सर्वयक्षतैन्यसर्वकुम्भाण्डतनो सर्वग्रहण दुष्टचित्तान्यापरपिण्डन्य गृह्ण २ ग्रस २ मारय २ कट्टय २ पच २ हन २ सर्वबुद्धानां बलेन नाशय २ मुञ्च २ विद्रवय २ सर्वयक्षराक्षस यावत् मनुष्यामानुष्यं च बन्धय २ 20 संकोपय २ विक्षाम्प २ स्फोटय २ सर्वमन्त्रन्य सर्वयोगन्य विहन रक्ष रक्ष मां सर्वसत्त्वांश्च सर्वरत्न स्वाहा।

नमो रत्नत्रयाय नम आर्यावलोकितेश्वराय बोधिसत्त्वाय महासत्त्वाय महाकारुणिकाय महाकारुण्यमित्राय महालोकानुकम्पाय तद्यथा आशीविषनाशिनी दंष्ट्राविष-

नाशिनि जिह्वाविषनाशिनि हालाहलविषनाशिनि ये केचित् सत्त्वा अपदा वा द्विपदा वा त्रिपदा वा चतुष्पदा वा बहुपदा वा जरायुजा वा उपपादुकाः यावत् रूपिणो वा अरूपिणो वा संज्ञिनो वा असंज्ञिनो वाऽपि सत्त्वा नम
5 मा वा सर्वरोगप्रशमनि सर्वव्याधिप्रशमनि सर्वविघ्नप्रशमनि सकलकलिकलुषकलहविग्रहविवादवरप्रशमनि तद्यथा ॐ अङ्गे तरङ्गे भरङ्गे २ तरविरे तरवरे तद्यथा ॐ घर घर गिरि गिरि तद्यथा ॐ मुक्ते २ सुविमुक्ते छेदने विच्छेदने मङ्गले विमङ्गले सुसुमुखे रक्ष रक्ष मां
10 सपरिवारं सतनयदारं सपौत्रपौत्रिकं सकुलबन्धुवर्गं सर्वसत्त्वांश्च सर्वसत्त्व स्वाहा सर्वभयविमोचने सर्वोपद्रवविमोचने राजभयं मारभयं मरणभयं शास्त्रभयं अस्त्रभयं अग्निभयं उदकभयं चौरभयं स्वचक्रभयं अपरचक्रभयं गौणामध्यगतो वा सिंहमध्यगतो वा गजमध्यगतो वा
15 व्याघ्रमध्यगतो वा गोगवयमध्यगतो वा वैरमध्यगतो वा गिरिदुर्गमध्यगतो वा कृष्णसर्पमध्यगतो वा कान्तारमध्यगतो वा समुद्रमध्यगतो वा आयुर्बन्धनमध्यगतो वा वायुबन्धनमध्यगतो वा प्रमुच्यतां नम मव। नमो आर्यावलोकितेश्वराय बोधिसत्त्वाय महासत्त्वाय महाकारुणिकाय
20 प्रत्यर्थिनः करुण आर्यवीर्यरणे स्वाहा। ॐ जयन्ति विजयन्ति अजिते अपराजिते स्वाहा ॐ जयाय स्वाहा ॐ अपराजिताय स्वाहा। तद्यथा ॐ वज २ ॐ विमले अमले अमृतोद्भवे हुं २ फट् २ स्वाहा।

नमो रत्नत्रयाय नमश्चण्डवज्रपाणि महायक्षसेनापति

नमो भगवते अप्रतिहतबलवीर्य-विदिचिविद्यादरसहस्र-
चतुर्भुज-लाक्षतिशरीर असिमुसलपरशुपाशवज्र अग्नि-
ज्वाल अतिभीषणकरूप पशुपतिदशाञ्जलविलम्बित-
दक्षिणपाद सर्वतियन्तका तव विनिष्ट वामचरण उष्णीष।
5 नमो भगवते महावज्रधर नमो रुद्र नमो हृदयं परम-
दयारुणं सर्वभूतगणविनयकरं रोषास्त्राशीविषडकरं सर्व-
कर्ष सिद्धिकरं आवर्त्तयिष्यामि तद्यथा भोः २ वज्र २
काल २ कर्म २ कम्प २ बद्ध २ मर्द २ हहा हिहि
हुं तुं रौद्रातिरौद्रानुसारिणं इमि दंष्ट्राग्रचन्द्रग्रह मयि
10 दुष्टचित्तं प्रविनाशय रौद्ररूपं प्रविनाशय रौद्रवज्रेण प्रवि-
नाशय विष्णुं प्रविनाशय ब्रह्माणं प्रविनाशय सर्वरोगान्
प्रविनाशय सर्वापदं प्रविनाशय सर्वक्लेशान् प्रविनाशय
सर्वदुष्टचित्तान् प्रविनाशय सर्वविघ्नान् प्रविनाशय सर्व-
नयान् प्रविनाशय सकलकलिकलुषकलहविग्रहविवादान्
15 प्रविनाशय देवासुरगरुडगन्धर्वकिन्नरमहोरगादीन् प्रवि-
नाशय चातय २ कम्पय २ बन्धय २ मर्दय २ चण्ड २ मर
२ दय २ कुरु २ महाबल २ महावीर्य २ महादीप्त महा-
तेजः महारौद्र महाशासनतुरु २ दर २ वर २ स्रवर २
स्वभवन्त २ भवानि के हुं फट् स्वाहा ॐ सूक्ष्मतीर्थाय
20 नमः स्वाहा...ॐ सर्वतथागतपादवन्दनं करोमि। ॐ
सर्वतथागतार्यगुरुपादवन्दनं करोमि नैवेद्यं सर्वसंयुक्तं अद्य
भोज्यं समानीत्य सर्वगन्धरक्षोपेतं ददामि। प्रतिगृह्यताम्।
ॐ अकारो मुखं सर्वधर्माणां आद्यनुत्पन्नत्वात् ॐ वज्रा-
स्फारणकं ॐ वज्रनैवेद्यं हुं फट्......।

रत्नत्रयं मे शरणं सर्वं प्रतिदिशाम्यहम् ।
अनुमोदे जगत्पुण्यं बुद्धबोधौ दधे मनः ॥
उत्पादयामि वरबोधिचित्तं
निमन्त्रयामि बहुसर्वसत्त्वान् ।
5 इष्टां चरिष्ये वरबोधिचारिकां
बुद्धो भवेयं जगतो हिताय ॥
उत्पादयामि परमं बोधिचित्तमनुत्तरम् ।
यथा त्रैयध्वका नाथाः सम्बोधौ कृतनिश्चयाः ॥
त्रिविधां शीलशिक्षां च कुशलधर्मसङ्ग्रहम् ।
10 सत्त्वार्थक्रियाशीलं च प्रतिगृह्णाम्यहं दृढम् ।
बुद्धं धर्मं च सङ्घं च चिरत्नाग्रमनुत्तरम् ॥
अद्याग्रेण ग्रहिष्यामि संवरं बुद्धयोगजम् ।
वज्रघण्टां च मुद्रां च प्रतिगृह्णामि तत्त्वतः ॥
अद्याग्रात्तं ग्रहिष्यामि महावज्रकुलोच्चये ।
15 चतुर्दानं प्रदास्यामि सत्कृतं तु दिने दिने ॥
महारत्नशुद्धे योगे समये च मनोरमे ।
सद्धर्मं प्रतिगृह्णामि बाह्यं गुह्यं त्रियानिकम् ॥
महापद्मकुले शुद्धे महाबोधिसमुद्भवे ।
संवरं सर्वसंयुक्तं प्रतिगृह्णामि तत्त्वतः ॥
20 पूजाकर्म यथाशक्त्या महावज्रकुलोच्चये ।
उत्पादयामि परमं बोधिचित्तमनुत्तरम् ॥
गृहीतं संवरं कृत्स्नं सर्वसततकारणम् ॥
अतीर्णान् तारयिष्यामि अमुक्तान् मोचयाम्यहम् ।
अनाथान्नाथयिष्यामि स्थापयिष्यामि निर्वृतौ ॥

ब्रह्मविष्ण्वीश्वरा ज्ञेया अकाराक्षरमूर्त्तिजाः ।
महादेवोऽर्धचन्द्रश्च बिन्दुश्चैव सदाशिवः ॥
नादमूले स्थितो देवः शून्यश्च परमः शिवः ।
मध्ये शिवपरं शून्यं नादान्ते चापि शून्यकः ॥
5 श्रीशून्यं मेऽर्धचन्द्रोऽस्ति बिन्दुः शून्यात्मदेवकः ।
श्रीनादो महाभैरवः अर्थव्यञ्जनरक्षकः ॥
ॐ ॐ वज्रपति शिरोःभेय वक्त्रे चापि पितामहाः ।
महते हृदये तथा पिता गुह्ये तथैव च ॥
माता तिष्ठेत्कराग्रे च सुता वामकरे स्थिताः ।
10 पुत्रा दक्षिणपादे च वामपादे प्रपौत्रकाः ॥
ओङ्काराद्यान्तसलुद्रं अङ्कारेण विदर्शनम् ।
तर्पणं सर्वपूजनं प्रसीदन्तु नमः स्वाहा ॥

ॐ अनन्तशयनाय नमः सिंहासनाय नमः देवासनाय नमः पद्मासनाय नमः देवपितृप्रतिष्ठायै नमः स्वाहा ।
15 ॐ ॐ पितृभ्यश्च मातृभ्यश्च नमः स्वाहा ॐ ॐ प्रजापतये नमः स्वाहा । ॐ पितामहेभ्यः स्वाहा ॐ मातामहेभ्यः स्वाहा। ॐ प्रपितामहेभ्यः स्वाहा। ॐ प्रमातामहेभ्यः स्वाहा । ॐ आकाशमरलावय हुं ।

निर्वाणा पितरश्चैव निर्वाणा च पितामहाः ।
20 निर्वाणा महादेवता - - - - - ॥

तोष्यन्तु लेप्यन्तु पुष्यन्तु तिष्ठन्तु जिघ्रन्तु भोज्यन्तु तृप्यन्तु शम्यन्तु ।

ॐ सोमपानं च विप्राणां क्षत्रियाणां च विर्भुज ।
वैश्यानां मद्यपानं च शूद्राणां तु सुखर्थिनाम् ॥

नमः स्वाहा......तोष्यन्तु तिष्ठन्तु भुज्यन्तु सुकान्तु
गच्छन्तु मूर्च्छन्तु स्वर्गन्तु मोक्षन्तु लेप्यन्तु शम्यन्तु।
तोष्यन्तु पितरो देवा तोष्यन्तु पितरो गणां।
तोष्यन्तु पितरः सर्वे तोष्यन्तु पितरो नमः स्वाहा॥
5 लेप्यन्तु...
पुष्यन्तु...
तिष्ठन्तु...
जिघ्रन्तु...
तिगन्तु...
10 भोज्यन्तु...
तृप्यन्तु...
शम्यन्तु...
ॐ अं मद्यपेभ्यः सोमपेभ्यो नमः स्वाहा।

Sanskrit Texts from Bali

IV.

1. कारकसंग्रह ।
2. चरित्र रामायण ।
3. The Sanskrit part of bilingual exercises.
4. नैष्ठिकज्ञान ।
5. दशशील ।
6. Initial Sanskrit stanzas at the beginning of works written in old-Javanese.
   (1) Agastyaparvan ;
   (2) Mahābhārata ;
   (Ādi, Virāṭa, Bhīṣma, Āśramavāsa).

कारकसंग्रहः।

अविघ्नमस्तु।

अस्तु शंसा नमस्यतु शङ्कराय महात्मने।
तथा वक्राभ्यां देवाभ्यां सर्वदेवेभ्य एव च॥
अप्रशस्तं प्रशस्तं वा तदेकैकेन वर्ण्यते।
कवीन्द्रस्य गीतिर्ज्ञेया तस्माद्यत्नेन नीयते॥
5 कर्म कर्त्ता तयोर्योगं यो वेत्ति स विचक्षणः।
यत्कृतं कर्म तत् प्रोक्तं स कर्त्ता यः करोति वा॥
तृतीया प्रथमा षष्ठी तिस्रः कर्तृत्वजातयः।
पञ्चमी सप्तमी ताभ्यां ऋते तत् कर्म शब्द्यते॥
सद्वितीया तृतीया च पञ्चमी षष्ठिका तथा।
10 विभक्तयश्चतस्रस्ताः करणं सम्प्रकाशिताः॥
तृतीयका चतुर्थी च षष्ठी तिस्रो विभक्तयः।
सम्प्रदाने समुद्दिष्टास्त्वपदानेऽपि पञ्चमी॥
विभक्ती द्वेऽधिकरणं षष्ठिका सप्तमी तथा।
तत्सर्वं युक्तितश्चिन्त्यं शेषे षष्ठी तु मन्यते॥
15 आदिका प्रथमी तज्ज्ञैः प्रोच्यते कर्तृकर्मणोः।
सीत सुग्रीव तच्छ्राव्यं कविना क्रियते मतिः॥
स्वयमेवापि वर्तेत कर्मकर्तेति मन्यते।
यथा लक्ष्मणं विद्धि त्वं वृक्षस्तिष्ठति कानने॥
द्वितीया कृत्यमुद्दिष्टं कर्म वा करणाश्रयः।
20 वेत्ति विद्यां नरो बोधिं अध्वगो याति गां प्रति॥
कर्तृत्वं सहयोग्यं च करणं देशकालयोः।
विशेषणं च हेत्वर्थं सूचितं गे तृतीयकम्॥

शूरेण सह मित्रेण हन्यतेऽरिर्वरे रणे ।
नत्मङ्घ्जं नोः चे स्वत्वें नाचा विनात्मना ॥
भूयस्तृतीयका ज्ञेया सम्प्रदानं च कर्मणि ।
साधुनां न ददौ दानं भूतेन च-कारकः ॥
5 सम्प्रदानं तदर्थं च चतुर्थी कर्मणि स्मृता ।
कामिने रतये नारी ददौ फलेय कामिनी ॥
अपदानं च करणं देशं हेतोस्तु पञ्चमी ।
रोध्यं दसे मृधा चौर्यं राज्ञा शत्रुर्निवार्यते ॥
शेषाधिकरणं देशं सम्प्रदाने च कर्मणि ।
10 निर्धारणं च करणे हेतौ कर्तरि षष्ठिका ॥
किनुरसि सतो न्तस्य धातु रतिनः रेवगोः ।
आत्मेस्ति सज्ञवेमदोस इदं साध्यस्य सत्कृते ॥
भवेऽधिकरणं काले देशे निर्धारण यथा ।
सुप्ता नार्यां गृहे रात्रौ प्रदेशे नृषु न स्वपेत् ॥
15 प्रज्ञा न संदिग्धा नृणां सुबुद्धिनामधीत्य तत् ।

अभ्रान्तिमिज्याय विद्यां तस्मात्तदिदं कारकसंग्रहाख्यं महानोधीते स्वनिबोधनाय ।

End of the work in the manuscript shown at Tabanan.

20 परात्मतत्त्वं संयुज्य युक्तितश्चिन्त्यमात्मसात् ।
प्रमाणीकृत्य वाक्यानि गुरूक्तानि मनीषिणाम् ॥
कातन्त्रं च महातन्त्रं दृष्ट्वा तेन उवाच — ।
बालावबोध[न]ार्थाय कृतः कारकसंग्रहः ॥

